नं० ४२७३-घ

नं० प्रकरणपञ्जिका-घ

4273

नं० ४२७३-घ

पत्राणि ५१/५२

(किन्त्वत्र १मं संख्याकं पत्रमनुपलब्धम्)

#1 MISSING.

51

F.

मिमांसाशालकनाथी

स्नायादिति स्मृतिप्राप्तस्नानकालबाधः। वेदमधीत्य तावन्न स्नातव्यं यावन्न धर्मो जिज्ञासित इति
तस्माद्वेदमधीत्य स्नायादिति स्मृतावध्ययनं मीमांसापर्यन्तमेवाभिप्रेतमिति। तथा च मीमांसा
करणीया न वेति चिंतां विधाय तु मत्रादौ दृष्टार्थो ध्ययनविधिरदृष्टार्थ इति चिंत्यते। शास्त्रारंभसिद्ध
र्थत्वेनायं विचारः क्रियत इति नात्रासंगतिराशंकनीया। तथा हि। अर्थज्ञानार्थत्वेन दृष्टार्थे ध्यय
नविधौ सत्यर्थगतसंदेहविपर्ययनिरासार्थत्वेन सप्रयोजनत्वाच्छास्त्रमारभ्यं भवति। इतरथा दृष्टा
र्थत्वे रक्षारणस्य तदभिव्यक्ताच्छब्दार्थप्रमित्यभावादवैधत्वेन च पु अंतरेणापि विधिं प्रतीयत
एवाध्ययनेन स्वाध्यायो ग्रस्यत इति। न च व्रीहीन्नवहंतीति वाक्यमार्थो विरविधिरिति शक्यते वक्तुं
अकृतत्व मेतादध्ययनस्य कृतत्वार्थत्वेन किंचन प्रमाणमास्ति अकृतत्वर्थश्च न नियमस्य विषयं अ
वघातादयो हि क्रतावेव नियम्यंते न तंडुलादिस्वरूपे अवघातेनैव संपादितेस्मिंस्तण्डुले क्रतु

शालिं०का फलभावनासिद्धिरितिप्रमाणांतरस्याविषयत्वात्तेनैवसिद्धिरितिनकिंचिद्विरुद्धं।स्वाध्यायग्रहणात्त
२ ध्ययनेनैवसिध्यतीतिनियमस्यप्रमाणांत्यविरुद्धं·स्वयमनधीयानस्यापिपरपुरुषाधीयमान
स्वाध्यायग्रहणादर्शनात्·नचाध्ययनस्वीकृतेनैवस्वाध्यायेनक्रतुफलभावनासिद्धिरितिः अ
कृत्वर्थतयाक्रतुसंस्पर्शाभावेननियमानुपपत्तेरिति।एतेनैवार्थावबोधस्यापिभाव्यतयासंबंधो
2 निरस्तोवेदितव्यः।तथाहियद्यप्यधीतात्स्वाध्यायात्फलवत्कर्मावबोधोदृश्यइतितस्यैवभाव्यता
वसीयते·तथापिविधिनापिविनान्वयव्यतिरेकाभ्यामध्ययनस्यावबोधसाधनत्वावगमाद्धिविरना
र्थकएव·नचाध्ययनेनैवार्थावबोधोभावयितव्यइतिनियमविधेरर्थवत्ता·प्रकारांतरेणापितत्सं
भवान्नियमानुपपत्तेः।नचाध्ययनेनैवार्थमवबुध्यानुतिष्ठतांक्रतुफलभावनासिद्धिरितिनियम एम०
तंभवति·अकृत्वर्थत्वादध्ययनस्य।तस्माद्विश्वजिन्न्यायेनस्वर्गएवकल्पयितव्यःप्राप्तेफलमा २

त्रे योनिर्दृशादित्यार्थवादिकरचितमधघृतकुल्यादिरित्यपित्रादिप्रसादलब्धसर्वकामफलावाप्तिरेव भा
व्यतयावसीयते। नन्वाध्याध्ययनेनार्थविदार्थवादिकं फलं श्रूयते· तत्रैषामर्थवादानामश्रवणात्तः
धारणजपयज्ञविध्यर्थवादास्त्वेतदाहुर्वार्त्तिककारमिश्राः। स्वाध्यायाध्ययनेनैव काचित्तृप्तिफलश्रु
तिः। धारणजपयज्ञेष्वयासाध्येवं निवारितेति·। सत्यमेवं· तथापि तेषामतिदेशतो लब्धेषु क्रत्वेव तदी
यस्य फलस्य भाव्यता। तथा हि लिङादियुक्तवाक्येषु द्वे भावने अवगम्येते· शब्दभावनाऽर्थभावना
चेति तत्र शब्दभावना पुरुषप्रेरणात्मिका· तस्याः पुरुषप्रवृत्तिर्भाव्या· तथा च प्रेरणाया सहयोर्लिं
ङादीनां वाच्यवाचकलक्षणः संबंधः स तत्र योग्यतया करणी तदाहुर्वार्त्तिककाराः लिङादयो हि प्रेर
णां कुर्वंत्यभिदधति वेति· प्रवर्त्तकस्य स्यादनयोग्यतया चार्थवादिकी स्तुतिरिति कर्त्तव्यता। तदेव
मध्ययनविधौ साक्षादश्रुतार्थवादके शब्दभावनायामितिकर्त्तव्यतामतार्थवादाकांक्षिण्यां

शा॰लि॰का॰ जपयज्ञाध्ययनादतिदेशेनार्थवादाः स्वीक्रियंते· तदाहुर्वार्त्तिककारमि   ः। अनुषंगानुमा
३ नाद्यैर्लप्स्यंते ये ति देशतः इतिः। ते चातिदिष्टा अर्थवादा अर्थभावनायां फलं समर्प्ययंति· रात्रि
सत्रवत्। एवमार्थवादिके फले भाव्यतयावसिते ऽध्ययनं समानपदोपात्तं कारणाकांक्षापरि
पूरकत्वेन समर्प्यते। एवं च यदेकस्मादर्थवत्तदेववत्तदर्थमिति न्यायेन स्वाध्यायशब्दवाच्यो
ऽक्षरराशिरध्ययनान्निष्पत्त्यर्थ एवावगम्यते एवं चान्यपरत्वादक्षराणां तेभ्यो प्रतीतिरेवानुप
पन्ना। व्युत्पत्तिविरहाद् व्यवहारेष्वनन्यपराणामेवाक्षराणामर्थावबोधकतया व्युत्पन्नानिष्पु
त्यपेक्षश्च शब्दोर्थावबोधकः। यः पुनरन्यपरेभ्योर्थावगमः स सामान्यतोदृष्टनिबंधः सोनन्यप
रत्वभ्रांत्या भ्रांतिरेवेति मंतव्यः। अप्रतीयमानश्चार्थो न विचारस्य विषयः नापि प्रयोजनमिति राम॰
विचारस्तावन्नारब्धव्यः· तदनारंभे च तदुपपाद्यम् तन्न्यायापरिज्ञानमनुपयोगि· तदनुपयोगे ३

चतन्निबंधनं मीमांसाशास्त्रं नारब्धव्यमिति पूर्वः पक्षः। राद्धांतस्तु स्वाध्यायोऽध्येतव्य इति स्वा
ध्यायस्य कर्मत्वावगमात्स एव भाव्यतयावगम्यते। यद्यपि नित्यत्वान्निर्वर्त्यकर्मता नास्ति स्वा
ध्यायस्य विकार्यकर्मता अध्ययनेन तस्य विकारानुपपत्तेः तथापि प्राप्यतया तस्य कर्म्मता
नानुपपन्ना। अत एव प्राप्यकर्म्मोदाहरणं वृत्तिकारस्य वेदाध्याय इति। यच्च कर्म्म तदर्थैव क्रियायु
क्तास्तोयं इत्यौतो विनियोगः। ननु स्वाध्यायस्य सक्तुवच्छेषित्वमनुपपन्नं फलवत्कर्म्मावबोधोप
योगित्वात्। यद्यपि चार्थावबोधोपयोगित्वमध्ययनात्प्राङ्नावगम्यते तथापि पश्चादुद्भव्येपि भव
त्येव प्रयोजनं। भाविनाचोपयोगेन शेषित्वं नानुपपन्नं। शेषिवत्। अग्निवत्। उत्पन्नानां स्वग्नी
नां विनियोगो नावगतविनियोगानामुत्पत्तिः आहवनीयादिशब्दानाम लौकिकार्थतत्तयोत्पत्ते
प्रागर्थानवगते होमादिषु विनियोगासंभवात् तथावोक्तः भक्तेमाव्युपयोग्यं। हद्रव्यसंस्कारमर्द

शालि·का ४ तेति।ननुचार्थावबोधोपाययोगितयासंस्कारविधिरनर्थकएवेत्युक्तं।नानर्थकः नियमार्थत
यार्थवत्वात्।ननुचनियमोनसंभवात्ऋक्त्वनुसंस्पर्शित्वादित्युक्तं। ननुसंभवतिस्वाभाविका
र्थपरत्वानुसारेणऋक्त्वनुप्रवेशितयाएवोचितत्वात्·यदिस्वल्वध्ययनविधेः ऋक्त्वनुप्रवेशि
तानाश्रीयतेतदाशब्दानांदृढव्यवहारव्युत्पन्नानांस्वाभाविकार्थपरताहीयते· अजहत्स्वा
र्थेनवचनंन्याय्यमितिऋतुफलभावेनानुप्रवेश्यएवाध्ययनसंस्कारोयुक्तः।तत्रकर्मविधिष
वनियमवर्णना· अध्ययनाविर्भावितैरेवकर्मविधिभिरर्थमवबुध्यानुतिष्ठेत्।ऋतुफलभाव
नासिद्धिरिति। अर्थवादेषु· अध्ययनाविर्भावितार्थवादैः प्ररोचिताक्रियमाणाः ऋतवःफ
लभावनायालमितिमंत्रेषुपुनरध्ययनपरिगृहीतैरेवमंत्रैः ऋतुषुस्मरणीयपदार्थस्मरणं राम·
फलभावनांगमिति। अध्ययननियमाश्रितश्चकालनियमोव्रतादिनियमश्च· श्रावण्यांप्रो ४

ष्टपद्यांवाउपाकृत्ययथाविधिः। युक्तश्छंदांस्यधीयीतमासानविप्रोर्द्धपंचमानिति। भवत्सर्वंचोद्देस
मपनीतोहिद्विजोत्तमः। भवत्वध्ययनंगुराजन्योवैश्यस्त्कभवदुत्तरमिति। एवंचानन्यपरत्वादस्मरणात्फ
लवत्कर्म्मावबोधोत्पत्तेर्विचारस्यविषयप्रयोजनलाभाच्छास्त्रस्यारंभणीयत्वं। विषयप्रयोजन
लाभेनविचारस्याध्ययनानंतरमुपनियतितत्त्वाद्गुरुकुलस्थितेरर्थवत्वात्तन्निवृत्तिमध्ययना
नंतरमामांस्मरहंदेमधीत्यस्नायादितिस्मृतिवचनमपन्यायमूलंदर्शयन्नर्थाववोधकृततया
स्वाध्यायस्यविवक्षितोर्थतांमन्यमानः सूत्रकारोविषयंप्रयोजनंचाह। अथातोधर्म्मजिज्ञासा
तिः। एतच्चव्याख्यातं अथातोधर्म्मजिज्ञासेति। एतच्चव्याख्यातं अथातोधर्म्मजिज्ञासासूत्रमा
घमिदंकृतं। धर्म्माख्यंविषयंवक्तुंमीमांसायाः प्रयोजनमिति॥ इंतदयुक्तं नहिलिङादयुक्तेवाक्ये
षभावनाभाव्यांतरमपेक्षते। अपर्वस्यभाव्यस्यस्वशब्देनाभिहितत्वात्। लिङादयोहिभाव्य

शालि·का· कोटिनिरस्तप्रधानभावा सर्वोपसर्ज्जनतापन्नामेव भावनामभिदधतीति विषयकरणीयोनिष्ठ
५ नतरमुपपादितं। अतो न सर्वप्रसंभाव्याकांक्षायामार्थवादिकफलसंबंधः नापि सिद्धान्तेस्वाध्या
यस्य साध्यतयान्वयः। कथं तर्हि विश्वजिदादिषु स्वर्गादिफलकल्पनं। यथा तत्तथा निशम्यतां।
यत्तदपूर्वं कार्यमभिमतं प्रतीयते तद्विषयत्वेन संबद्धकरणं भूयागाद्यनुष्ठानाधानात्मलाभं· न च विना
5 कर्त्तातदनुष्ठानोपपत्तिः न चाधिकारं कर्तृत्वलाभः न च नियोज्यमन्तरेणाधिकारसिद्धिः न चाविशि
ष्टो विनियोज्योऽत्र कल्प्येत विशेषणाभावेन स्वर्गकामना परिकल्प्यते· स्वर्गकामना चेन्नियोज्यवि
शेषणं ततोऽग्निहोत्रादिवत्स्वर्गस्यापि विनियोगतः सिद्धिरिति। भवत्त्वेवं अत्रापि तर्हि नियोज्य
विशेषणतयैवार्थवादिकफलं रात्रिसत्रवत्संबध्यतां। न। अन्यतोऽनुष्ठानसिद्धेः। कुतोऽन्यत एम
आचार्यकरणविधिप्रयुक्तः। कः पुनराचार्यकरणविधिः उपनीय तु यः शिष्यं वेदमध्यापयेद्द्वि ५

जः। सकलं सरहस्यं च तमाचार्यं प्रचक्षत इति स्मरणानुमितः शिष्यमुपनीय वेदाध्यापनेनाचार्य
कं भावयेदित्येवं रूपः। अलौकिकं चाहवनीयादिवदाचार्यकमिति तन्निष्पत्त्युपायविधानं युक्तमे
व। तत्राचार्यो ह्याचार्यत्वमुपगत एवाधिकारी द्रव्यार्जननियमवत्। तत्र शिष्यं प्रति स्मृतिविहितत्वात्तद्धि
ताचरणादसिद्धाधानदर्शनात्तल्लिप्सोरेवाचार्यो भवनेत्। यथादीक्षणीययादीक्षितत्वसिद्धिस्त
थाध्यापनेनाचार्यत्वसिद्धिः। उपनयनं च तत्प्रत्ययेनाध्यापनसमानकर्तृकमवगम्यमानमेक
प्रयोगतया विना समानकर्तृकत्वासंभवादंगांगिभावेन च विनैकप्रयोगत्वानुपपत्तेराचार्यभाव
नाकरणमतमध्यापनं प्रत्यंगत्वेनावतिष्ठते। तदाश्रितश्चाष्टवर्षं ब्राह्मणमुपनयीतेत्येवमादिनि
यमः। उपनयनं च स्वभावत उपनयासत्तिप्रयोजनकमिति तद्द्वारेणैव तस्यांगत्वं। न चाध्ययनं
प्रत्यनुपयोगि न उपनयस्यासत्तिरध्यापनोपकारणान्क्षपनेऽस्य कर्म्मापेक्षायामुपनयनं प्र

शा॰लि॰का॰ क्रमयस्वाध्यायोध्येतव्य इत्यध्ययनंविधीयमानमुपनेयस्यकर्मत्वमवगम्यते॥ अध्ययनंचापनो
६ पयोगीतिसिद्धमेतत्। तेनस्वाध्यायमध्येष्यमाणस्यमाणवकस्योपनयनमध्यापनांगमित्यध्या
पनस्यविधिः स्वागमत्तमुपनयनंप्रयुंजानस्तस्यान्यथानुपपत्त्याध्ययननिष्पत्त्यालब्धासिद्धिः स्वा
ध्यायाध्ययननियोगेनाधिकारांतरमपेक्षते॥ तेनायंविश्वजिन्न्यायस्यविषयः नापिरात्रिसत्र
न्यायस्य॰ अनन्यप्रयुक्ताविषयनियोगगोचरत्वात्तयोः अतएवप्रयाजादिनियोगेषुतयोरवत
6 तारः अन्यथाराद्धांतेपिकामश्रुतिप्रयुक्तमध्ययनमितिविधातोध्येष्वपिकर्मसुशूद्रादीनामधि
कार स्यात्। अतोध्यापनविधिप्रयुक्तत्वादध्ययनस्ययेषामेवोपनयनंतेषामेवतत्प्रयुक्तमं
त्रत्वाभावाच्छूद्रादीनामनधिकारः॥ एवंचविध्यंतरप्रयुक्तेध्ययनेनरात्रिसत्रन्यायेनएवंपरत्वासंको एम॰
चिती॥ नचातत्प्रयुक्ताएवंपरत्वः तत्प्रयुक्तत्वाचराद्धांतइतियुक्तं। अतत्प्रयुक्तत्वेकारणाभावात ६

यच्चोक्तं नियमार्थो विधिरिति तदयुक्तं स्वाध्यायाध्ययनस्य विनियोगनिष्पत्त्यर्थतया विधानेनव
चनस्यार्थवत्त्वात्। स्वाध्यायोऽध्येतव्य इति तव्यप्रत्ययेन हि विधिरभिधीयते· न चावहंत्यादिष्विव क्रतु
विषयनियोगानुवादोऽयमवकल्पते· असंनिधानात्क्रतुनियोगानां। संनिधानवशेनैषां हि क्रतुनि
योगप्रत्यभिज्ञानात्क्रतुनियोगानुवादोपगमः भवेदह संनिधानमस्ति। नापि पर्णमयीजुह्वर्भवती
तिवत्पदार्थसंबंधमुखेन विनियोगप्रत्यभिज्ञानं। स्वाध्यायस्याव्यभिचरितक्रतुसंबंधत्वात्क्र
मित्येवमादीनामनर्थकानां स्वाध्यायांतर्गतिदर्शनात्। यत एवात्र नियोगः साध्यतयावगम्यते
ऽत एव स्वाध्यायस्यानीप्सिततया संबंधोऽवगम्यते· एकस्मिन्वाक्ये साध्यद्वयविरोधात्· न च स्वर्गा
दिवत्स्वाध्यायस्य नियोज्यविशेषणतयान्वयादविरोधः अनियोगफलत्वात्स्वाध्यायग्रहणस्य
यदेव हि नैयोगिकं फलं तदेव साध्यतया नियोज्यविशेषणमिति तत्रतीयदर्शितं· अनभिज्ञो हि भ

शालि॰का॰ वान्विषयनियोज्यानामित्यत्र। अतोध्ययनविधिविषयप्रतिपादनेनैव तस्यार्थवत्त्वान्न क्रत्वङ्ग
८ प्रवेशकल्पनया नियमार्थता विधेः। अन्ये पुनरेवं वर्णयंति। अध्यायनविधिप्रयुक्तमध्यय
नमध्यायनांगं अंगतया स्वाध्यायस्यान्यपरत्वादविवक्षितार्थतेति। तदयुक्तं प्रयुक्तिमात्रेणाता
दर्थ्यानुपपत्तेः। स्यान्मतं। यथा प्रजापतिव्रतस्वतंत्रकर्त्रैवगमात्तदनुभूताधिकारसिद्ध्यर्थंनि
7 योज्यपरिकल्पनं। तथा प्रयुक्तिदर्शनात्तादर्थ्यमिति। तन्न। प्रयुक्तेस्तादर्थ्यव्यभिचारात्। असत्य
पितादर्थ्ये केवलोपकारमात्रेणाधानस्य क्रतुविधिभिः प्रयुज्यमानत्वात्। कथं   पश्वेकत्वादी
नामंगत्वं। न तावद्विभक्तिरेव क्रतुसंबंधितया एकत्वादिकमभिधत्ते येनारुण्यवद्वाक्येन विनियोगः
स्यात्। विभक्त्यो हि प्रातिपदिकास्वार्थंश्च स्याऽभिदधतिः नापि करणीभूतस्यैकत्वमुच्यते। संख्या राम॰
न्वितस्य वा करणत्वं। करणत्वैकत्वयोर्युगपदभिधानात्। अतो न वै नियोगिकं शेषत्वं विभक्त्य ८

भिहितायाः संख्यायाः इष्यते वशेषत्वं· तच्च क्रतुप्रयुक्तिकृतमेव। नैवं· न तत्रापि शेषत्वमोपादानिकं
संनिविष्टसमाम्नानमात्रेण विभक्त्यर्थस्यापि याहृकं प्रत्यैदमर्थ्यादिति तस्यैवाभिधानं तदन्यथानुप
पत्त्या केवलाभिधाननिबंधनं स्वरूपसंबंधमतिलंघ्य साधनीभूतसंख्येयसंबंधाध्यवसानमिति
नोपादानिकं तत्रापि शेषत्वं। भवतु तर्हि लिंगादेवाध्ययनस्याध्यापने विनियोगः। नैवं भवितुमर्ह
ति· सामान्यसंबंधसापेक्षत्वाल्लिंगविनियोगस्य। न चात्र सामान्यसंबंधापादकं किंचिदस्ति प्रमा
णं। ननु च णिच्श्रुतिः प्रकृत्यर्थभूतस्याध्ययनस्य शेषतामापादयति। तत्र प्रयोजकव्यापारस्य
प्रयोज्यव्यापारोत्पत्तिहेतुत्वाद्विपरीतशेषतापत्तेः वाक्यप्रकरणस्थानसमाख्यानानि त्वध्ययन
स्याध्यापकं प्रति विनियो   कतया नाशकनीयान्येव। यंथविरोधप्रसंगत्ववादिनां· यत एवादमाह
भगवान्प्रयोज्यत्वादनंगत्वाच्च भवति संशय इति। तस्मादनंगतयैव पूर्वपक्षयितुं शक्यते। उच्यते

शालि·का· सर्वोहिविधिरधिकारपर्य्यवसायी·नचाध्ययनविधौकस्यचिदधिकारोस्तीत्युक्तमेवाग्नेःसाक्षाद्श्रव
८ णात्।अध्यापनविधिप्रयोज्यतयाचकल्पनानुपपत्तेः।तत्रयएवासौप्रयोजकविधिव्यापारःसए
वप्रयोजनमितियुक्तं।प्रथमोपनिपातित्वात्।यत्नपियस्यानंगतदर्पितस्यप्रयोजनंभवत्येवश्रा
धानस्यैवहोमदियइति।ननुवानंतरस्ताविकर्म्मावबोधफलतयाध्यापनस्याध्येतुराधिकारोऽध्य
4 यनेप्रतीयतइतितत्प्रयोजनंनैवस्वाध्यायविधेर्युक्तोऽन्तरंगत्वात्।न·तस्योत्तरकालभावित्वा
त्तत्स्यायांहिप्राप्तावंतरंगतावल्लवती·नचानयोरधिकारयोस्तुल्यप्राप्तिःप्रथमोपनिपातित्वात्
प्रयोजकविध्याधिकारस्यःउत्तरकालभावित्वाच्चार्थावबोधनिबंधनस्याधिकारस्य।यद्वावाध्यापन
विध्यधिकारसिद्धिरध्ययनस्यप्रयोजनमित्यध्ययनविधिनाबोधितं·तदाध्यायनानिष्पत्त्यर्थत्वा रम०
त्स्वाध्यायस्यान्यपरत्वादविवक्षितार्थत्वं·अविवक्षितश्चार्थोनविचारणीयइतिवेदाध्ययनमात्रेणा ८

वगुरुकुलस्थितेः कृतार्थत्वादध्ययनानंतरकालं गुरुकुलनिवृत्तिरेव युक्तेति मत्वा स्मृतिर्वेदमधीत्य
स्नायादिति। अत्र न स्नानमात्रमदृष्टार्थं विधीयते। किंतु यो ब्रह्मचारिणो न स्नायादित्यस्नाननियम
स्तस्य पर्यवसानमेतत्। अध्ययनांगतया नियमनात्तन्निवृत्तिप्राप्ताविदमुच्यते। अस्नाननियमत
त्वात्तया गुरुकुलवासादीनामपि निवृत्तिः प्राप्तेवतिः सकलब्रह्मचारिधर्म्मनिवृत्तिरेवाध्ययनानंतर
मुच्यते। एवं चाध्ययनविधिना विचारस्यानाक्षिप्तत्वात्तदुपायभूतन्यायनिबंधनमीमांसाशास्त्रं ना
रंभणीयमिति पूर्वः पक्षः॥ राद्धांतस्तु। यद्यपि प्रयोजकविध्यधिकारः प्रथमभावी तथापि न तन्निष्प
त्तिः प्रयोजनमिति युक्तं। किंतु दृष्टार्थावबोधकतयाध्ययनोत्तरकालभाव्यप्यध्येतुरेवाधिकारः प्र
योजनतया युक्तमाश्रयितुं कर्तृसमवायित्वात्। तत्कर्तृकं हि यत्कर्म्म तस्यैव तत्तैस्वर्यमिति युक्तं
अंतरंगत्वात्। न च सहसैवाधिकारादध्यर्शेनादनान्नाधिकारकल्पनाकारणमत्तिः परप्रयुक्तत्वं तु ष्ठा

शालि·का नस्यसिद्धत्वात्· यत्र त्वधिकारकल्पनामणो प्रागनुष्ठानं न लभ्यते: तत्रानुष्ठानात् प्रागवगतो यो
२ धिकारस्तदनुप्रवशितान्याप्याः इह त्वध्यापनविधिप्रयुक्तेवाधिकारपर्यवसानकल्पनामंतरे
णाप्यनुष्ठानं लब्धमिति प्राथम्यमात्रं किंचित्करं: अंतरंगत्वादध्येतुरेवाधिकारो युक्त इति:। तदेवम
९ ध्ययनविधेरन्यप्रयुक्त्यं वानुष्ठानसिद्धेर्नियोज्यो नास्ति: अधिकारां तु विद्यत एव। यदर्थं हि यत्कर्म
स तत्राधिकारी अत्रावबोधोपयोगेन वाध्यत्रर्थताध्ययनस्येति तत्राधिकारी सचार्यमधिकारः प्रा
गध्ययनान्नावगम्यंम्यते ऽध्ययनोत्तरकाले चावगम्यते: स्वाध्यायाध्ययनं स्वेव मर्म्मं निर्वर्त्यते। श्रा
वण्यां प्रोष्ठपद्यां वा उपाकृत्य यथाविधि। युक्तश्छंदांस्यधीयीत मासान्विप्रोऽर्द्धपंचमान्। ततः पश्चात्तु छंदां
सि शुक्लेषु नियतः पठेत्। वेदांगानि रहस्यं च कृष्णपक्षेषु संपठेत्। इत्थं वाध्ययने क्रियमाणेऽगाध्यय राम·
यनसंस्कृतस्य वद्वाक्यस्यार्थावगमो जायते· स इदानीमध्येतामन्यते· मदुपयोगिककर्म्मावबोधकतया २

मदर्थमध्ययनमिति। सोयं वेदाध्ययनमीमांसाश्रवणयोर्मध्येधिकारः सोयं तान्मौलिकः शास्त्रार्थः।
इममेवाधिकारमालोच्य पित्रादयोर्थदानादिना काश्चिदानपुत्रासंनुपनाययंति· प्रवृद्धाश्च केचन स्व
यमेवात्मानं· अन्यथाध्ययनासंभवात् अनुपनीतस्याध्ययनप्रतिषेधात्। नाभिव्याहरयेद्ब्रह्म स्वधा
निनयनादृते। स शूद्रेण समस्तावद्यावद्वेदा जायत इति। एवं तावदध्ययनविधिस्मृत्यनुमितं क
स्यचिद्स्वाध्यायमतमाश्रित्य राद्धांतवर्त्मना कृताः। अन्ये तु कृताध्यापनविध्यनुसारेणैवमाहुः।
यद्यध्यापनविध्यधिकारप्रयोजनता स्वाध्यायाध्ययनविधेः स्यात्तदाध्यापनविधेरपि स्वाध्यायां
तर्गतत्वादविवक्षितार्थत्वेन तत्प्रयुक्ततापि न संभवतिः स्वशाखा हि स्वाध्यायशब्देनोच्यते· साक्षादधी
तश्चाध्यापनविधिर्न नं केषांचित्वशाखानां स्वशाखांतर्गतो भवेदिति स्वाध्यायाध्ययनस्याविवक्षितार्थ
त्वान्न तत्प्रयोजकत्वमवकल्पत इति पश्चाज्ज्ञाव्यर्थाववोधोपयोगितयाध्येतुरधिकारोध्ययनविधे

शास्त्रि॰का॰ १० प्रयोजनमिति॰ननुस्वाध्यायोध्येतव्यइतिनियोगसिद्धेरेवगमात्तन्निष्पत्त्यर्थत्वादध्ययनस्यान्यपर
त्वादर्थविवक्षादुर्भरेव॥मैवं॰यदिकेवलनियोगनिष्पत्त्यर्थतैवाध्ययनस्यस्यात॰स्यादेवंपदार्थाव
बोधोपिप्रयोजनतयास्वीक्रियतेतदार्थपरत्वंताप्यस्तीतिनाविवक्षितार्थता।कथंपुनरेकस्मि
न्वाक्येप्रयोजनद्वयं। उच्यते॰ शाब्दनियोगनिष्पत्तिरेवप्रयोजनं॰ आर्थंतर्थावबोधनमितिनविरो
धः॥यच्चतदर्थबोधाख्यंप्रयोजनंतत्रकेवलाध्ययनसाध्यमित्यध्ययनविधेरेवस्वप्रयोजनसिद्धये
विचारमाक्षिपति॰विचारस्यचन्यायनिबंधनत्वान्न्यायानांचमीमांसाशास्त्रगम्यत्वान्मीमांसाशास्त्रस्य
चगुर्वायत्तत्वान्नवेदाध्ययनानंतरंगुरुकुलान्निवर्त्तितव्यमितिमन्यमानोभगवान्सूत्रकारः एवंप्रस्तु
तयमस्तत्तांस्मरते ईशीयितुंधर्म्मजिज्ञासोपदेशमुखेनाध्ययनानंतरभाविनींगुरुकुलनिवृत्तिप्रति राम॰ १०
षेधांनिरमाह॰ अथातोधर्म्मजिज्ञासेति॰वेदवाक्यार्थविचारविरोधिनींगुरुकुलनिवृत्तिरेवकेवला

निवार्यते· न सकलेन तस्मै स्ववरणादि ब्रह्मचारिधर्म्मनिवृत्तिः असमाप्तसकलब्रह्मचारिधर्म्मनियम
श्च न स्नातकदाराधिगमो धिक्रियते· स्नातकस्य दाराणाञ्च गमस्मरणात्। स्नातकः सदृशीं भार्यां विन्दे
दिति। तस्माद्गुरुकुलोषितानां सकलेतरब्रह्मचारिधर्म्मान्यारिस्य ज्य वेदार्थो विचारयितव्यः अविचा
रितस्यानिर्णीयमानत्वादनिर्णीतवेदार्थस्यैव गुरुकुलान्निवर्त्तेत ततः कृतदारसंग्रहः श्रौतादिनित्य
नैमित्तिकधर्म्माधिकारप्राप्तात् अनुष्ठानं कर्त्तुमसमर्थः प्रसज्येयात· तस्मादध्ययनानन्तरमेव वेदार्थो
विचारयितव्य इति· विचारोपायभूतन्यायनिबन्धनं मीमांसाशास्त्रमारब्धव्यमिति सिद्धं॥ ॥शास्त्र
मुखं नाम गुणेरा विधृतं गम्भीरमपि भारं। शालिकनाथेन कृतं प्रकरणमेतत्प्रसन्नतरं॥ ॥इति शास्त्र
मुखं नाम प्रकरणं॥ बहुधा जातिविषये विवदन्ते विपश्चितः। प्रभाकरमते नायं तेषां व्यत्यास उच्यते॥
अत्र केचिदाचक्षते· जातिरिति विकल्पमात्रविलसितमिति। अन्ये तु सतीमपि जातिमाश्रयेभ्यो

शालिं०का ऽभिन्नामत्रमन्यंते। अन्येतुभिन्नामप्यनुमेयामाहुः अपरेतुभिन्नाभिन्नामिच्छंति। तथाऽजाताव
११ पिजातिव्यवहारोबहुलमुपलभ्यतेकेषांचिदितिः तन्निराकरणायेदमारभ्यते। जातिराश्रय
तोभिन्नाप्रत्यक्षज्ञानगोचरः। एवमाकारावमर्शेनप्रभाकरगुरोर्मता।। नन्वाश्रयएवद्रव्यंजातेर
स्त्वितिसौगताः तथाहिपरमाणुषुचतुर्विधेषुपार्थिवाप्यतैजसवायवीयेषुजातिराश्रितामि
मताः अनुवृत्ताकारप्रत्ययविरहात्। भिन्नेषुहियदभिन्नाजातिरूपेयते। तत्रानुवृत्ताकारावभासिनीबुद्धि
रेवनिबंधनं। नचकस्यचनजंतोः परमाणुप्रकरणपदवीदूरवर्त्तिषुनिपुणामपिनिरूपयतोऽनुवृत्ता
कारानुकारिणीमतिराविर्भवतिः। यदिचेयंपरमाणौउपरमाणौरितिमतिः सापिपायमंडस्थलक्षण
गुणकारणिकामीमांसकैरपिसंगीयते। पृथिवीत्वादिकमपितत्तदसाधारणगंधादिगुणसमवायमात्र राम०
लब्धात्मलाभायांपृथिव्यादिबुद्धौनिर्निबंधनं। नचस्थूलेषुद्रव्येषुजातिः समवैतीतितेषामेवदुरधिग ११

गमत्वात्· न खलु स्थूलद्रव्यारंभो घटते। तथा हि द्व्यणुकादिक्रमेण स्थूलद्रव्यारंभो ऽभिधीयते· तत्र ताव
त् द्व्यणुकारंभ एव न साधीयानिति मन्यामहे· न खलु तमेकैकः परमाणुरारभते· द्रव्यस्यैकाकिनो द्रव्या
रंभकत्वानुपपत्तेः। न चैकैकद्रव्यव्यतिरिक्तमपरमारंभकमस्ति संयोगे ऽपि वा तयोरनुपपन्न एव· स हि
नैकैकद्रव्यसमवेतः नाप्यनेकद्रव्यसमवेतः एकैकातिरिक्तानेकाभावात्। अनेनैव प्रकारेण त्र्यणु
कस्य त्रिभिर्द्व्यणुकैरारंभणीयस्य महिमगुणशालिनः संभवो निरस्तः तदेवं दूरीभूता स्थवीयसां
द्रव्याणामारंभसंकथा। अपि चावयविनः किमवयवेषु प्रत्येकं कार्त्स्न्येन वृत्तिर्व्यासंगेन वेति चिंतनी
यं। न तावत्कार्त्स्न्येन वृत्तिमुपलभामहे· एकैकावयवगतस्य तस्याप्रतीतेः एकैकावयवगते च कम्पे रागे
वा सकलस्यावयविनः कम्परागप्रसंगात्। अवयवांतरे च कम्परागविरहे कम्परागविरहसमापत्तेर
वयवी कम्पेत न कम्पेत· रज्येत न रज्येतेति विषमां दशामाविशेत्। नापि व्यासंगेनावयविनो वृत्तिः अ

वयवांतराविरहात्· अवयवांतच शालिनो हि केनचिदवयवेन कश्चित्केनचित्कचनेति व्यासंगिनां वृ
त्तिरुपपद्यते· किंच एकैकस्यौ शब्दंतेरवृत्तिरेवः। एकातिरिक्तानेकाभावात्सकलावय वग्रहणाएवनि
यमेनावयवी ज्ञायेत· नचतया संभवति· अवयवांतरेणावयवांतरतिरस्कारात्। नचप्रकारांतरेण
वृत्तिरिति वक्तुं शक्यते· अनुपपत्तेः प्रकारांतरस्य। अवयवेभ्यश्चावयवी व्यतिरिच्यमानोऽव्यति
12 रिच्यमानो वा न प्रमाणेन संगच्छते· व्यतिरिक्तो हि तद्ग्रहणेपि कदाचिद्ग्रहणमनुभवेत्· नहि भिन्नयो
सहोपलंभनियमो घटपटयोरिव· तद्वदवयवी भिद्यमानो नावयवैः सहोपलभ्येत। कस्यांचिद्दशाया
मननुभूयमानेष्वप्यवयवेष्वनुभूयेत। नचावयविनमवयवानुभवमंतरेण केचिदुपलभंते। अव्यति
रिच्यमानस्तु नास्त्येवेति वचनभंगीमात्रेणोत्कर्षो भवति। तदेवमवयविद्रव्यमनुपपत्तिभिरनुसंधीयमान
मेकांततो विलीयते। कथं तर्हि स्थूलावभासिनी मतिः· सा समर्थनीया। इत्थं। उत्तराधरभावेन निरंतर

मुत्पन्नाः परमाणव एव तमधिगतेंद्रियकज्ञानजननयोग्यदशाविशेषाः प्रत्यक्षमीक्ष्यंते । तांस्तत
थाभूताननुसंदधतस्तत्स्थूलभावीमानतत एष स्थूलविकल्पो विजृंभते । इत्यादिवत्तद्रूपनिरंतरभुसंभ
यमानेषु वनमितिमतिः । अतस्त्वदीयसांख्याणामाश्रयतयाभिमतानामयोगाज्जातिरपितदा
श्रितानाभ्युपगमर्हति । अपिच जातिरपिनेंद्रियज्ञानेन प्रतीयते तस्यानित्यतयाभ्युपगमात् । न
हि नित्यं कस्मैचित्कार्यायपर्याप्तः तद्धि न शक्तस्वभावः नित्यं कार्योपादापत्तेः । अशक्तस्वभावं तु नि
त्यत्वादेवः । अचिकित्सनीयशक्तिकं नित्यं न किंचित्कुर्यात् । न चाजनकमिंद्रियज्ञानस्य ज्ञेयतामनुभ
वति । यो हि विषयः स्वान्वयव्यतिरेकौ ज्ञानमनुकारयति स प्रत्यक्षः । किंच समुन्मीलितवस्तुषाश्चिरा
यविषयांतरानुसंधानव्यावृत्तचित्तस्य पुरोवर्तिनीकांतासींस्वास्तिमतींवासासाक्षुवीरास्य न जाति
रपराभासते । अन्यच्च न जाति चसौ पिंडैः सहोत्पद्यते विनश्यति वा । तथाभ्युपगमे स्वरूपहानिप्रसं

गात्·एका हि जातिरनेकाधिष्ठाना प्रतीयते·उत्पत्तिमती विनाशयोगिनी चान्यास्यात्·विरुद्धधर्म्मा
ध्यासस्य भेदापादकत्वात्। सोयं नित्या जातिरुदितवत्साव्यक्तौ प्रतीयमाना नान्यत आयाता: नि
ष्क्रियत्वात्·न च तत्रैवासीत्·प्रागप्रतीतेः। न च स्थितिरपि युक्तिमती·व्यक्तिरेव हि तस्या देशो नाका
शादिः अनुपपन्ना च व्यक्तिरिति क्वावतिष्ठतामाकृतिः न चोत्पाद्येऽवतिष्ठते·तदेषा जातिरवति
ष्ठते नावतिष्ठते चेति संकटमापतितं। किंच·व्यक्तेर्भिन्नाऽभिन्ना वोभयरूपा वा जातिः स्यात्·तत्र
तावन्नाभिन्ना·तथाभावे व्यक्त्या सहोत्पादे विनाशे वा स्वरूपहानिर्येतिप्रसङ्गत्वाद् इतिं व्यक्तिमा
त्रांगीकरणे च कोस्मत्पक्षस्यास्य च भेद इति चिंतयंतः सौद्गतिवहवः व्यक्तिमात्रमेव तत्त्वमिति वदंतो सा
हायकमाचरितमनतिरेकिनी जातिमुररीकुर्वाणाः। भिन्नत्वे पिण्डग्रहणमन्तरेणाग्रहणापत्तिः उभय
प्रतीतेश्च संबंधप्रतीतिसमापत्तिः। अस्त्येवेति चेत्·अहो महदिदं वैजात्यं·कः खल्विह गवि गोत्व

मितिमप्रकपगवदन्यत्रनिरस्तत्वपायंत्रणाद्भवतः। भिन्नत्वेतिव्यक्तिविकल्पोऽनिर्वारएवः किंव्या
संगेनरत्तिः उतप्रत्येककात्स्न्र्येनवेतितत्रकात्स्न्र्येपक्षेः एकत्रसमाप्तावन्यत्रनवर्त्ततइतिपुनरपि
स्वरूपापहारः। व्यासंगोपिकालत्रयवृत्तिनीषुव्यक्तिष्वनुपपन्नएवः प्रत्यक्षंचगौगौरितिप्रत्ययो
विकल्पमात्रमित्यंगीकृतंस्यात्। नचोभयरूपतानविरोधात्। नत्वोपलंभमात्रेणाविरोधएवना
स्तीतिचत्तरत्वं। तथाविधस्यैवोपलंभस्यासंभावनीयत्वात्ः अभिन्नाकारबुद्धिवोध्यंवस्तुभिन्न
मितिलौकिकाः विलक्षणाकारबुद्धिविषयंचभिन्नं। तत्रयदिविलक्षणाकारप्रतीतिसमयेद्वेव्यक्ती
नीविलक्षनाकारेणावभातः तत्रऽभेदप्रतीतिदशायामेकआकारोनुभवनीयः सः जातिभागस्यपिंड
भागस्यवा। तत्रैकस्यद्विस्वभावोयंस्यात्तज्जातिजातेमतोरभेदावभासः। अथविलक्षणाकारोता
दात्म्येनावभातइति। तत्रापिपर्यनुयोजनीयंः किमिदंतादात्म्यंनामेति। यद्येकाकारतेतिब्रूयात्ः त

शालि·का हिंपूर्वोक्तमेवदूषणमापतितंस्यात्। शब्दयोःसामानाधिकरण्येनालत्म्यमितिचेत्·अयुक्तमिदंगौ
१४ र्वाहीकइत्यादावतादात्म्येपितद्दर्शनात्। उपचारस्तत्रेतिचेत्अत्रापिभिन्नजातिवादिनउपचार
मेवमन्यंते। वयंतुःविवक्षामात्रपरतंत्राःशब्दानवस्तुव्यवस्थापनायेशतइतिसर्वसमन्मामहे।
कथंतर्हिगौगौरितिनानाभूतासुव्यक्तिषुबुद्धिरभिन्नाकारमुल्लिखंतीसमुपजायते·तेनास्याएव
14 बुद्धेर्द्वैभिन्नःकारणमनुमन्यामहे· अस्तितद्विशेषणांयदुपरागवशेनेयंभिन्नेष्वभिन्नाकारानुसंधा
यिनीधीरुदयतइति। तदपिनजातिसाधनसमर्थं·कार्यभूताहिबुद्धिरेषाकारणमाक्षिपंतीयदनं
तरमेवोपजायतेतदेवकारणंतयाकल्पयति·नपुनरप्रतीतमपिकिंचिदुपस्थापयति। साचेयंस्व
लक्षणविषयदर्शनसमनंतरभाविनीताएवव्यक्तयःस्वनिर्भासांमतीतिमुपजनयंतामेकाकारव एम०
भासिनीधियमाविर्भावयंति·नितांतभेदमतीनामपिव्यक्तीनांकासांचिदेषमाहिमानसर्वासामि १४

तिकिमनुपपन्नं। तथाहि भिन्ना अपि चक्षूरूपालोकमनःसंस्कारा एकसामग्रीमुपनिपतिता एकं विज्ञा
नोदयलक्षणं कार्यमारभंते। तथाव्यक्तयोपि भिन्नाः किं नारभंतु इति नेदं प्रतिपत्तिकठिनं। सा चेयं स्वा
कारेणाभेदाध्यस्यंती क्रमेदयोगिनीनामपि व्यक्तीनां भेदं संवृणोतीति संवृतिरिति गीयते। एषा च मनी
षानलक्षणमात्रं विषयीकरोति। तस्याविशदावभासत्वात्। अस्याश्चाभिलापसंसर्गयोग्यप्रतिभासि
त्वात्। अभिलापाच विशदाकारमवभासयितुमशक्तेः। अभिलापमात्रेण तथाविधप्रतिपत्त्ययोगा
त्। तेनैषा नष्टाकारावभासिनी। नन्वेतत्प्रतीतिपराहतं प्रतीतं गौरयं बुद्धेर्विशदावभासात्। उच्यते।
न विशदावभासित्वमवजानीमहे सानुमनंतरभाविनो निर्विकल्पकप्रत्ययस्य स्वलक्षणावलंबिनः प्र
सादात्तदभावे तथात्वानुपलंभात्। न चैतद्वाच्यं एकमेव बाह्येंद्रियैर्विशदाकारमनुभूयते शब्दैश्चा
विशदमवभासितमिति। भिद्यमानेपि बोधोपाये बोध्याभेदे बोधवैलक्षण्यानुपपत्तेः। अपि च निय

ताकारं स्वलक्षणं· अनियतश्चाकारोऽस्यां बुद्धौ चकास्ति· तदेवं विशदाविशदतयानियतानियतरूपतया
च स्वलक्षणस्य विकल्पाकारस्य च भेदे सत्यपि विकल्पाः सासात्स्वरम्यरयावा स्वलक्षणविषयदर्शन
प्रभवतया स्वलक्षणाभिमानिनो जायंते· त एव तत्र प्रवर्त्तयेतः पुरुषानुव्यवहारांगभावमनुभवंति
पारम्पर्येण वस्तुनि प्रतिबंधाद्वस्त्वपि प्रतिलंभयंति· मणिप्रभायां मणिबुद्धिवत्· तथाहि खलु मणि
प्रभायां मणिधिषणायां मणिकेरणाविषायेणां मणिबुद्धिरयथार्थतयाभेदमनुपमाणोपि मणि
मनुप्रतिबद्धा ते मणिसमधिगतनिमित्तं भवति· तथेयमपि पस्तुतः स्वलक्षणासम्बद्धान्यपि स्वलक्ष
णाद्दर्शनं दर्शनतो विकल्प इति स्वलक्षणप्रतिबद्धा सती तत्प्राप्तये प्रभवति· निर्विकल्पकप्रत्ययसमधि
गतस्वलक्षणप्रापकतया च स्मृतिरियमुच्यते· तत एव च गृहीतयाहित्वात्प्रमाणं· अन्यथाऽवस्तुवि
षयापि वस्तुप्रतिलंभकतयानुमानवत्प्रमाणमेव स्यात्· स चायमाकारः प्रतीयमानो न ज्ञानस्ये

व· बहिष्ठेनावभासात्· न चार्थगत एव· उक्तेन न्यायेन निरस्तत्वात्· किंत्वयमसन्नेव ज्ञानमनुभासतः
शाद्भिन्नप्रतिभासः एतत्तु शास्त्रचिंतका विवेचयंति प्रतिपत्तारस्तु दृश्यविकल्प्यावेकीकृत्यैवास्यमे
वानुमन्यमाना व्यवहारेषु प्रवर्त्तन्ते· प्रवृत्ताश्चार्थप्रतिलंभादपि संवादं मन्यंते कथं पुनरेकत्वाध्य
वसायो दृश्यविकल्प्ययोः अतद्व्यावृत्ततया सदृशत्वात्· यथा दृश्यस्यातद्व्यावृत्तता· तथा विकल्प
स्यापि· तस्माज्जापाप्रत्ययो विकल्पमात्रं परमार्थतस्तु न जातिर्नाम किंचित्। अपि च द्रव्यसमवायि
नी जातिरभिमता न च रूपादिव्यतिरिक्तं द्रव्यमुपलभामहे चक्षुरादीनां प्रत्येकं रूपादिष्वेव व्यापारादि
ति पूर्वपक्षसंक्षेपः॥ अत्रोच्यते॥ सम्विदेव हि भगवती विषयसत्तोपगमे शरणं· गवादिषु तु स्वलाका
रावलम्बिनी संविदुदीयत इति निर्वाहः। न यवीथ्यां च निर्मातं प्रमाणं स्मृतिश्च नः प्रत्यय इति। ननु त
देवासदिति मन्यंते· अवयव्यादीनामेकांततोऽनुपपन्नत्वात्। उच्यते। न हि दृष्टे काचिदनुपपत्तिः· न

नत्वावयविनोऽनुपपत्तिः आरंभकाभावात्। अनुपपन्नेयमनुपपत्तिः कार्ये हि प्रतीते कारणकल्प
नायां प्रमाणं। न पुनः स्फुटावधारणं कार्यं कारणनिरूपणायापह्नवमर्हति। तेनायं वेदा एव समासा
दितसंयोगलक्षणसमाधारणगुणा अवयविनमुत्पादयन्ति। संयोगश्चैक एवानेकत्र वर्तते। एकैक
त्र संयुक्तप्रत्ययानुदयात्। एकैकातिरिक्तानेकाभावेपि एकैक एव सद्वितीयश्चाश्रयः संयोगस्ये
ति न दोषः। ननु द्रव्ये एव निरंतरेत्यन्नमती संयोगविकल्पमाविर्भावयतः न तु तदतिरेकी संयोगो ना
म कश्चिद्गुणविशेषः। तन्न प्रत्यभिज्ञायेते हि द्रव्ये अनुवृत्तेका सचितकी हि तयोरपरेयं दशा दृश्यत
इति भवत्येवमेतत्सिद्धिः। स्यापिता हि मीमांसाजीवरक्षायां प्रत्यभिज्ञा। अतः संयोगलक्षणसाधा
रणगुणसमवायिकारणोपगृहीता अवयवाः। एवं समवायिकारणं समवायिन उपपद्यन्ते। यश्चाय राम०
मवयविनो वृत्तिविकल्पदोष उक्तः सोवयविनः प्रतीतौ स्थितायामनुपपन्नः। व्यासक्ता एवावयवे १६

ष्ववयवीनजातिवदभ्यस्त्येकपरिसमाप्तेः अवयवान्तरैरपि विनाशात्तस्य कोपि महिमा यत एक एवानेका
वयवान् स्पृशन्त इति किं न कल्प्यते। यद्यपि चावयविन एकत्वेनाऽवृत्तिस्तथापि नावृत्तिदोषं संयोगस्त
चिरा एवावयवावयविनोर्जनका आश्रयभूताय तो जनकत्वेनैवाश्रयत्वात्समवायिकारणानामत
एव संयोगेपि सद्वितीय एवाश्रय इति न दोषः। न च सकलावयवोपलब्धितापेक्षा तदुपलब्धिः अवयवि
नस्तेभ्यो भिन्नत्वात्। न चैतावतामेकावयवमात्रग्रहणेपि ग्रहणप्रसङ्गः पर्यनुयोगो युक्तः कार्यानुगुणत्वा
त्कारणकल्पनायाः। कार्यसिध्यर्थं हि कारणं परिकल्प्यते न कार्यविनाशाय। तेन यावतावयवानां ग्र
हणात्तदुपलम्भस्तावतामेवावगमस्तदवगमनिबंधनमिति दर्शनबलेनाभ्युपेयते। भिन्नत्वेपि तत
एव सत्योपलम्भनियमः उपायोपेयभावात् उपेयभूतोऽवयवी उपायभूताश्चावयवाः प्रत्येकं तु श
क्यत एवासहोपलम्भोऽपि वक्तुं। अवयवान्तरयोगिनो हि परिग्रह इत एवयवव्यतिरेकोपि सुदर्शः ए

शा॰लि॰का॰ वाऽयंचभेदसाधनेपियुक्तिः अन्वयव्यतिरेकाभ्यांहिवस्त्वंतत्त्वमवसीयते। अवगम्यमानोपिचावय
१७ वीविलक्षणाबुद्धिगोचरतामाचरत्येव। अवयवीहिस्थवीयानेकोत्हदयमागच्छतिः अवयवास्तुस्तोदी
यांसोभ्यासश्च· सचावयवीमहत्त्वाद्रूपवत्त्वाच्चचाक्षुषस्पर्शिनोवापार्थिवोवाआप्योवातैजसोवाऽवा
यवीत्तमसत्त्वात्स्पर्शवत्त्वाच्चस्पर्शनएवः द्व्यणुकस्तुबाह्यतुमौनिकोऽप्यमहत्त्वादप्रत्यक्षएव· तस्यवामह
17 त्वमवयवबहुत्वमहत्त्वप्रचयविशेषाणांमहत्त्वगुणकारणानामभावात्तगगनादीनांतुमहत्तामपि
रूपस्पर्शविधुरतयानप्रत्यक्षः गोचरेतिकृतमतिविस्तरेण। ननुसकलावयवाश्रितत्वादवयविना
स्तिरोहितैरवयवैः सहेंद्रियासंनिकर्षात्कथमवयविनासमागमः· नवासंनिहितमेवबहिरिंद्रिय
मवबोधकमितिप्रतिज्ञायुज्यते· अवयवानामप्यसंनिकृष्टेंद्रियग्राह्यतापत्तेरिति। उक्तोत्तरमेतत् राम॰
त·भिन्नत्वादवयविनोवयवांतरासंयोगेपिसंयोगवद्बुद्ध्यादिषूपपन्नएवेंद्रियसंनिकर्षोवयाविनः १७

तदनयादिशा तावद्रूपपन्नमाश्रयद्रव्यमाकृतेः स्थूलं। ननत्कं रूपादिव्यतिरेकि द्रव्यं नापपद्यत इति॥
किमिदं पश्यतोहरत्वं। प्रतीयते हि महानवयवी रूपादिव्यतिरेकी। अत एव जवाकुसुमसंनिधानाभिभू
तद्रूपमपि स्फटिकद्रव्यं प्रत्यभिज्ञायते कथं नामागृहीतं प्रत्यभिज्ञायेत। अपि च दर्शनस्पर्शनाभ्यामे
वाकार्थग्रहणाद्रूपस्पर्शव्यतिरेकि द्रव्यं स्फुटतरं प्रतीतं नापह्नोतुं शक्यते। अत एव वनादिषु बाधकप्र
त्ययबलेनैव नैयकल्पना प्रसरति। इतरथांतरालाग्रहणनिबंधनोयमभेदव्यवहारः प्रवर्तत इति॥
अवयविनिरुवाधकं ज्ञानं नान्यतोऽतिपरस्तादेवोदितं। तेनाश्रयद्रव्यलाभाज्जातेरपलापः प्रलापमा
त्रमिति स्थितं। यच्चेदमुदितं नित्यतया जातेरात्मज्ञानजननेऽपि न शक्नोतीति। तदपि भस्मणाभंगनि
राकरणपर्वणि विस्तरेण नित्यानामप्यर्थक्रियाकारकत्वसमर्थनेन प्रत्युक्तं। मा वापि ज्ञानं जातिजी
जनतः। न खल्वनियमज्ञो राज्ञः कारणाभूतेनैव प्रत्यक्षेण भवितव्यमिति। यत्र यत्प्रतीयते स तस्य वि

शालि॰ का षयइतिसार्वलौकिकं।ननुप्रत्यक्षमप्यविसम्वादादेवप्रमाणं· असंविद्रूपश्चतस्माद्विषयादात्मला
१८ भात्· अन्यतस्तुभवतस्तदनात्मभूतस्यनित्यस्यवाप्रतिबंधाभावेननियमेनाविसम्वादायोगा
दितिवलाद्रूपेयंप्रत्यक्षस्यकारणमेवविषयइति। अतएवप्रत्यक्षमनुमानंचद्वावेवप्रमाणे·
तयोरेवार्थाविसम्वादकत्वात्·प्रत्यक्षंसाक्षादर्थप्रतिबद्धं· अनुमानंत्वर्थप्रतिबद्धलिंगजन्मतयापारं
18 पर्येणतत्रप्रतिबद्धं।यस्यतुनसाक्षान्नापिपारम्पर्येणार्थप्रतिबंधः नतस्यप्रामाण्यमुचितं·तस्य
तदविसम्वादनियमाभावात्· अथाविसम्वादादेवप्रामाण्यंव्यवजिहीर्षितोलोकाआद्रियंते।सिद्धे
दयंमनोरथः· यदिज्ञानांतरनिबंधनोयमविसंवादःप्रार्थनीयः·यद्धिविषयमेवयदिज्ञानंतेनैवतस्मिन्वि
षयेपर्युपस्थापितेनास्तिप्रत्ययांतरनिबंधनाविसंवादप्रार्थना·। अर्थेनाप्रतिबद्धमपिज्ञानंस्वमहिम एम॰
पर्युपस्थापितार्थंतदविसम्वादकत्वमवर्त्ततेतेनोत्पत्तिमात्रविज्ञानंस्यपरापेक्षानप्रामाण्येऽर्थावि १८

सम्वाललक्षणो: अतः सिद्धं शाब्दादीनामर्थप्रतिबंधविरहिणामपि प्रामाण्यं· एतदर्थमेव च नयवार्थ्यां
सर्वेज्ञाने विपर्ययतः कालाकांक्षां सा स्वात्मनीवानात्ति + याव्यभिचारेति प्रतिपादितं: अतो नित्यायाया
मपि जातो भवत्येव प्रत्यक्षस्य प्रामाण्यं· यु स्वनरुक्तं: एकभावेन समाकल + जातिप्रतीतिरिति। त
दसिद्ध आकारो हि सा प्रतीयते· यदि परमार्थान्तरानुसंधानविकल्पतया तस्यानुवृत्तिर्नावसीयते: अ
नुवृत्ताव जाति नानुवृत्तिः अयहरोऽपि च धर्मस्य धर्मिग्रहणं नातपपन्नं। अत एव पिंडान्तरसमधि
गमे पूर्वाकारावमार्शिनी मनीषा प्रत्यभिज्ञाख्योदीयते। यच्चोक्तमनाश्रयतया नान्तत्रैव प्रागवस्थि
ता· निष्क्रियत्वान्नान्यस्मादागच्छति स्वरूपहानिप्रसंगान्न व्यक्त्या सहानुजायमानानां संबंधमनुभ
वति जातिरिति· तदीयमायासोपजननं यथाजातजनो हेतुर्जनमात्रं। संयोगो ह्युभयकर्मजा भवति
मल्लयोरिव मेषयोर्वा· अन्यतरकर्मजो वा स्याणुश्येनयोरिव। संयोगजो वा· यथा तंतुतरीसंयो

शा० का०
१९

गादुत्पन्नमात्रस्यपटस्यतन्तुभिःसंयोगः सचकर्मवाप्राक्तनंविधानंवाऽपेक्षतेः समवायस्तुसंयोगादि
भ्योनसंयोगजोनकर्मजोवाऽतोनकर्मवातत्रप्राक्तनंवाऽपेक्षतेयतएवतुपिंडस्योदयसमवायि
कारणात्ततएवजातिसमवायोपितस्यसंपद्यते। समवायंचनवयंकाश्यपीयाइवनित्यमभ्युपेमः। विन
ष्टायामपिव्यक्तौनजातिरन्यत्रयाति। नचतत्रैवावतिष्ठतेः नचविनश्यति। केवलंतद्व्यक्तिसमवायस्तु
तस्यानिवर्त्तते। तेनतस्याअनुपलंभनं।। नयाति। निष्क्रियत्वात्। नावतिष्ठतेव्यक्तिमात्राश्रयत्वा
त्तदभावेवावस्थानानुपपत्तेः। नविनश्यति। पिंडांतरेप्रत्यभिज्ञायमानत्वात्। विनाशोनामास्यांतिको
ऽनुपलंभइत्यस्मत्कल्पयामहितं। अतोनासंकटंकिंचित्। यत्तुपिंडभ्योजातिरभिन्नत्वमुभयरूप
त्वंचदर्शितं। तदस्माकंसाहाय्यमेवाचरितं। कोहिनामसचेतनःपदार्थांतरंप्रत्यभिज्ञायाभेदाश्रयणा राम०
न्नसाधयेत्। कोवापरस्परविरोधिनीएकस्यद्वेरूपेप्रतिजानीते। भेदवादःपुनरस्माकंसम्यतएवं। नच १९

19

तत्रेहप्रत्ययापत्तिदोषः एवं प्रतीत्यस्याधारमाधेयं च सम्बंधं प्रतीयात्‌· सर्वत्र चापि ग्रहणमंतरेणान
प्रतीयते। तेन समानेंद्रियग्राह्यतया जातिरपि व्यक्तिप्रत्ययानुप्रवेशिनीति नेहप्रत्ययसंभवः· कर्म
णोत्वनुमेयेभवत्येवेहप्रत्ययः। इत्तिविकल्पनुक्तत्वपरिसमाप्तिरेवांगीकरणीया· न चान्यत्रावृत्ति
दोषः प्रत्यक्षसमधिगम्यमानत्वादृत्तेः प्रत्यभिज्ञाप्रास्यापितत्वात्‌· इत्थं ग्रहणं तु जातेरपि सिद्ध
मेवाव्यक्त्यंतरेहिजातिः प्रतीयमाना प्राच्यपिंडपरिहारेण प्रकाशते उदीच्यपिंडपरिहारेण तु प्राक्तन
पिंडसमधिगमसमये स्फुट एवेति परिहृतनिखिलानुपपत्तिकं गवादिषु साधारणाकारानुभवसि
द्धं जातितत्त्वं· उपपन्नं च प्रत्यक्षत्वेप्यत्वं जातेरिंद्रियव्यापारानुविधानेन प्रतिपत्तेः· संयुक्तसमवा
यालक्षणाश्च सन्निकर्षान्नानुपपन्नं च प्रत्यक्षं गौरिति विशदतरार्थावभासिनी संवित्प्रकाश्यते ऽपव
हितं समसमय संभव त्विति विकल्पकवलेनोत्थं प्रथत इति चेत्‌। तन्न· तथाभावे प्रमाणाभावात्‌· श्रा

शालिं॰का ब्दमात्रेण केवलाकारपरिगृहीताकारिप्रतीतेरूपांतरानवभासाच्चाविशदावभासः ऐंद्रियके तु सं
२० वेदने प्रचुरतरार्थावयवरूपावभासाद्विशदावभास इति न वास्य विषयत्वापत्तिः। नन्वेषा जातिप्र
तीतिर्भिन्नामपि व्यक्तिमभेदेन गमयंती जायत इति भ्रांतिरेषा। न प्रत्यक्षं प्रमाणं। इयं तु भ्रांतिर्नि
र्बीजा न जायत इति बीजभावेन जातिरनुमीमीयते तत्समवायश्च। दृष्टा हि संतापनं संचारितदहन
40 परमाणुसंहतायो गोलके दहनाकारानुकारिणी प्रतीतिरिति। तदिदमुक्तोत्तरमपि पुनः पर्यनु
युज्यामहे विस्मरणापराधादिति मन्यामहे। भिन्नादि जातिरवगम्यते। न खल्वाकारमाकारिणं चैक
मेवमन्यं ते। केवलं शब्दप्रयोग एव समाधिर्वक्तव्यः। तत्र लौकिकप्रयोग एव शरणं। प्रयोगश्चैकस्या
लक्षणाया गोरया वा ढेत्या नानुपपन्नः। समवायस्तु भवतु वस्त्वंतरे सिद्धेनुमेयः प्रत्यक्षेण तस्या एम॰
नवगमात्। आकृतिस्तु प्रत्यक्षप्रमाणसिद्धा नानुमेया। न चानुमानमपि शंकां शाक्यप्रतिबद्ध २०

खित्यलमतिविस्तरेण ॥ अत्र केचिद्भावादितुल्यतया द्रव्यगुणकर्मसु त्रिषु सत्तासामान्यमंगीकुर्व
न्तिः भवति सर्वं च सत्सदिति प्रत्ययानुवृत्तिरिति वदंतः तदिदमपरामृष्टजातितत्त्वानामुपर्युपरिजा
ल्पितं । सर्वरूपानुकारिणी यदि धीरुदीर्यते तर्ह्यम्भ्रूपेयैव जातिः न च नानाद्रव्येषु सर्षपमहीधरा
दिषु गुणेषु वा गंधरसादिषु समानाकारानुभवोस्तिः केवलं च सदिति शब्दमात्रमनुयुज्यते भवणादि
विनापि जात्या पाचकमीमांसकादिशब्दप्रवृत्तिः । ननु शब्दप्रवृत्तिरप्येकाः नैकं निबंधनमंतरेणो
पपद्यते । सत्यमस्त्येवोपाधिरेकः प्रमाणसंबंधयोग्यतानाम । तत्रान्यः पंडितंमन्यो मन्यते । नन्वि
दमसमंजसमुच्यते सर्वत्रैकोपाधिभेदमवगम्यौपाधिकशब्दानुविद्धः प्रत्ययो भवतिः न पुनः प्रागेव
सह वा । इह च प्रमाणमेव जायमानमस्तीत्येव जायतेः प्रमाणोत्तरकालं त्वनया धिया भवतिव्यं ।
किंच सत्यपि प्रमाणयोगे किंचिदस्तीति गम्यते किंचिन्नासीति तथान्यद्भविष्यतीतिः । तत्र प्रमा

शा॰का॰ णसंवंधस्यवर्त्तमानत्वात्सर्वत्रवर्त्तमानप्रत्ययेनभवितव्यं॰तदतिरेकिणोउसत्वेतस्यत्रैधाव्यवस्था
२१ नाघक्तात्त्रिधावभासः।अपिचभूतलनिखातेषुचिरकालवर्त्तिषुप्रलीनत्वात्स्वरूपेषलिंगादिरहि
तेषुसकलप्रमाणप्रत्यस्तमयेपिसत्तासंदेहपरिहृश्यतेः सचप्रमाणसंवंधातिरेकिणीसत्ताभ्यंत
रेणानुपपन्नेत्यत्र एवेति।तदिदमनाकलितपदवचनस्यकेवलंगलगर्जितं।उक्तमस्माभिःप्रमाण
संवंधयोग्यतोपाधिरिति।यदिप्रमाणसंवंधउपाधिरितिवदेमःतत्स्यैकपालभ्येमस्वपि।योग्यताउ
21 प्रमाणसंवंधातिरेकिणीप्रमाणेनावसीयतइतियुक्तएवास्तीतिप्रमाणोदयः।तस्याश्चत्रैकाल्याव
गमोपिसमर्थितएव॰तस्याश्चसंज्ञायितनायुक्तैव।कापुनरियंप्रमाणसंवंधयोग्यतानामः।ननुना
मांतरेणमहासामान्यमेवोररीकृतं।नैतदेवं॰योपिदिमहासौसामान्यंसत्तोमंगीकुरुतेःसोपिस्वर एम॰
पसत्तांपदार्थानामनुमन्यतएवः अन्यथाशशविषाणादीनामनुपपत्त्यातिरश्त्तानांचकिमितिम २१

महासामान्यसंबंधोनस्यादितिपर्यनुयोगेकःपरिहारं।नान्यदस्तिस्वरूपाभावादित्यतः।तेनस्वरूपस्य
तैवप्रमाणासंबंधयोग्यता।यस्यहिस्वरूपमसन्नतत्प्रमाणेनपरिछिद्यते·तेनत्रैकाल्यमपिस्व
रूपस्यैवयुक्तंनमहासामान्यस्य·निःस्वत्वात्।तथासंशयितताऽपितस्यैव·नपुनरसंशयितेस्व
रूपेपरसत्तायाःसंदेहोवतरति।अथनित्याया अपिसत्तायाःसंबंधोयःसत्रिकालस्तस्यैवत्रैका
ल्यंकुतः।नान्यदत्राततोस्वरूपत्रैकाल्यादित्यतः।तस्मात्स्वरूपसत्तोपाधिकएवसद्वहः।नपुनरेकए
वाकारःसत्तानामद्रव्यगुणकर्मणां।अपिवकाश्यपीयानांजातिसमवायविशेषेषुस्वरूपसत्तानि
बंधनएवमसद्वहःइत्यभ्युपगमः।तस्यचद्रव्यगुणकर्मस्वपितथाभावोस्त्विति।तदेवमप्याकृतेपदार्थ
स्वरूपातिरेकिणिसामान्येसत्ताख्येयत्सुमनीषानिर्मितकुतर्कवलेनसन्मात्रविषयंप्रत्यक्षमि
तिसाधितंतदपिदूरोत्सारितं।एतेनन्यायेनशब्दत्वमपिनिरस्तंवेदितव्यं·नहिककारखकारयोरेका

मा·लि·का· काकारमनुगतमुल्लिखंतीमनीषासमुन्मिषति। योपिचार्यशब्दशब्दः सोपिश्रोत्रयात्यतोपाधिव
२२ लेनतत्त्वप्रवृत्तिरितिनजातिकल्पनायैप्रभवति। तदिदमपहस्तितं· यदाहुः शब्दत्वमेवतत्तदसाधा
रणाभिव्यंजकध्वनिनिबंधनतयानानावर्णरूपासुपरूषव्यक्तिषुपरूषत्वादर्थांतरभूतमेकमा
कारमात्मसात्कु+पतयाविषयीभवत्तस्यतस्यार्थस्यावगमायावकल्पतइति। अनयैवदिशाब्रा
22 ह्मणत्वजातिरपिनिवारितनहिनानार+ वंतीमतिराविर्भवतिनहिक्षत्रियादिभ्योव्यावर्तमानेस
कलब्राह्मणेष्वनुवर्तमानमेकमाकारंविरमनुसंदधतोपिबुध्यंते। यदप्याहुः। यद्यप्यापातसंज्ञा
तयाधियाब्राह्मणत्वंनावसीयतेः तथापिब्राह्मणाभूतमातापितृसंबंधानुसंधानात्तत्संनिपतितायां
वृद्धौतत्त्वकास्तीति। तदपिवाङ्मनसयोर्विसम्वादि। अनुसंधानेपिमतोपितृसंबंधकोनुजात्येकमाका एम०
रमवबोद्धुंप्रभवति· यद्वोपदर्शितं· यथाविच्चीनमाज्यंतैलादव्यतिरिच्यमानंगंधग्रहणसहकारि २२

णा च सुषेव भिन्नमवगम्यत इति तदपि न सुंदरं। न हि तदानीं चाक्षुषस्य संवेदनस्याविषयातिरेकः
किं त्वनुमानमेव· तत्र सर्पिषः यत्कस्वरूपमपि निरूपयितुं क्षमः स च सुषेवाज्यजातिं प्रत्येति· न
गंधग्रहणं प्रत्यपेक्षते· नन्वेवं वक्तवहीनं· किंनिबंधनेन हि तदानीमाहवनीयादिसाध्येषु कर्मसु
केषांचिदेवाधिकारो नान्येषां· किंनिबंधना हि ब्राह्मणशब्दप्रवृत्तिव्यवस्था। अत्रोच्यते अनादौ सं
सारे जन्यजनकभावेन व्यवस्थितावत्काश्चिदेव व्यक्तयः स्त्रीपुरुषसंततयः संति· तासामन्योन्य
व्यतिकरजाः स्त्रीपुंसव्यक्तयो ब्राह्मणशब्दवाच्याः अनिदंप्रथमतया संततेः सर्वेषां तत्संततिपति
तत्वात्सिद्धा ब्राह्मणशब्दवाच्यता· तेन संततिविशेषप्रभवत्वमेव ब्राह्मणशब्दप्रवृत्तावुपाधिः
तत्प्रभवानामेव कर्मस्वधिकार इति न किंचिदवहीनं। केपुनस्तत्संततिविशेषाः। न ते गणाप्यनि
र्दिष्टुं शक्यंते· किं तु लोकत एव प्रत्येतव्याः तथा च तज्जन्यत्वेवगते ब्राह्मणशब्दं प्रयुंजते लौकिका

शा॰लि॰का॰ २३ कथं पुनस्तज्जन्यत्वमेव शक्यते गन्तुं स्त्रीणामपराधसंभवात्· संभवन्ति हि पुंश्चल्योपि स्त्रियः परिणी-
तारं व्यभिचरन्त्यः। उच्यते· उत्कमेतत् तद्दृश्यादर्शनमभाव इति· तत्र यावत्स्युपलब्धिसामग्रीनावस्थां
सत्यामपि यासां व्यभिचारो न दृश्यते तासां नास्त्येव व्यभिचार इति लोकप्रमाणमेतत्·। अपि वा
प्रमत्तैः स्त्रियो रक्षणीया यासां व्यभिचारो न दृश्यते तासां नास्त्येव व्यभिचार इति लोकप्र संभावना
23 शंकायां सा मास्ति मा भूत्तदपत्येषु तत्संततिप्रभवत्वनिश्चयः· न चैतावता यत्रापि निश्चयः श-
क्यस्तत्राप्यनिश्चय इति युक्तं। यच्च वह्निज्वालास्वकवार्त्तिकावर्त्तिनीषु ज्वालात्वसामान्यं· प्रत्य-
भिज्ञागोचरः केश्चिदिष्यते· तदप्यस्माकं गुरुर्नमृष्यति· सहि खल्वेवं निरीक्षांचक्रे· अनन्यथासि-
द्धावद्भिः सामान्यकल्पनाबीजं इयं च भेदाग्रहणेनापि शुक्तिकारजतवदुपपद्यत इति नालं सामान्य- राम॰
मुपस्थापयितुं। तेन भेदग्रहणापरस्पराभेदग्रहणां भिन्नेषु जात्यभ्युपगमे शरणमिति निरवद्यं २३

॥ ॥शालिकनाथेन कृतं कृतमतिना जातिनिर्णयाख्यमिदं बहुविधविवादहरणं प्रकरणं रणा
वधानेन॥ ॥जातिनिर्णयाख्यं प्रकरणं समाप्तं॥ ॥प्रभाकरगुरोर्भावं परिभाव्याधुनोच्यते॥ मी
मांसाजीवरक्षेयं क्षणिकत्वनिराकृतिः॥ अत्र सुगतमतानुसारिणः क्षणभङ्गिनः सर्वानेव पदार्थ
नभिदधति। किं पुनस्तेषां प्रमाणं। न तावत्प्रत्यक्षं क्षणिकतामीक्षितुं क्षमते। तद्धि भावविष
ये निपुणमपि निरीक्षमाणस्य क्षणिकताध्यवसायाभावात्। स्यादेषा मनीषा। क्षणिकता नाम
भावस्वभाविनी तेन भावानुभवादेव प्रत्यक्षं क्षणिकतामपि मपि साक्षात्करोतीति। तदिदं मनो
रथमात्रमिति मतिमन्तो मन्यन्ते। तथा हि सन्निहितविषयव्यवस्थितय इति स्थितिरियमवि
वादा सकलवादिनां तद्धि यमपि क्षणिकता भावस्वभावावहिर्भूता सती सन्निहितिमधिरोहतीति त
द्व्यतिरिक्तानां व्यवतिष्ठेत नान्यथा। न च तथाविधा संविदमुदीयमाना मदिसामहइति। कुत

त्तस्याभावस्वभावांतर्भाविता· कुतस्तत्त्वांच तदवबोधेनाववोधः। अयमन्वीरन् क्षणिकतामस्य
क्षमीक्षितापि न निश्चयपथमवतीर्णा तेनागृहीतेवावभातीति· तथापि न तस्यां प्रत्यक्षं प्रमाणं
यत्र हि प्रत्यक्षस्य स्वभावतो विकल्पविरहिणस्तत्स्पष्टभाविना विकल्पेन व्यापारोऽनुगम्यते· तत्र प्र
त्यक्षं प्रमाणमिति· सौगताः। यत्र च दृष्टमेतदिति प्रत्ययो नोदीयते· तत्रास्य समधिगतामिति
स्वसिद्धांतध्वांतापक्रांतस्वांतानां वाग्जालविलसितमिदं। यदपि केचिदूचिरे· प्रत्यक्षज्ञानं क्षणिकं
स्वकालाकलितवस्तुविषयत्वपि क्षणिकतामवगमयतीति· तदपि बालिशभाषितमवभासते· ए
कक्षणमात्रवर्त्ति हि· क्षणिकता न च प्रत्यक्षेण गृहीतैवेदानीमेवेदं वास्त्विति प्रतिपद्यते· कालंतरसंस्पर्शो
दासीन्यात्· प्रत्यक्षस्य प्रत्युत प्रत्यभिज्ञालक्षणं प्रत्यक्षमेव क्षणिकतां दूरमुत्क्षिपति· सर्वाप
रकालाकलितलोपरक्तभावकल्पनात्· अनुमानमपि संबंधानुसंधाननिबंधनं क्षणिकतां नप

सीकर्तुं समते· तया सह कस्यचिल्लिंगस्य संबंधबोधविरहात्तन स्वलक्षणाकलिते सम्बंधिनि संबं
धबुद्धिराविर्भवति· नचैतदुभयातिरिक्तिप्रमाणं तथागतमतानुवर्तिनो मन्यंते· तदिदमाकाशाम्त्रां
तमित्युपहसंति सौगताः। ते हि स्वभावहेतुकानुमानसमधिगमनीयां क्षणिकतामावक्षते· किंपुन
स्तदनुमाने उच्यते यत्तत् क्षणिकं संतश्च सर्वे भावा इति· भावमात्रानुबंधिनी हि साध्ये स्वभावो हे
तुर्भवति· यथा शिंशपात्वे वृक्षत्वं· शिंशपात्वमात्रानुबंधि हि वृक्षत्वं· तथेहापि सत्तामात्रानुबंधि
नी क्षणिकता· कथं पुनः सत्तामात्रानुबंधसिद्धिः· विपर्यये बाधकप्रमाणप्रवृत्तेः। अक्षणिक
त्वे हि व्यापकानुपलब्धिः सत्तां बाधते· अर्थक्रियाकारिता हि सत्ता नानएका विदृत्तिः सा च क्रम
यौगपद्याभ्यां व्याप्तानंतरीयकोटिविरहात्· अनयोः परस्परमेतिपस्समस्तयोरेकप्रतिषेधस्य
तरविधिनांतरीयकत्वं· नचक्रमयौगपद्ये अक्षणिकेषु संभवतः· तत्रत्ते निवर्तमाने सत्तामपि

शालिं०का
२५

निवर्त्तयतः स्वसत्तेव विशेषणं । कथमस्य क्षणिकेषु क्रमयौगपद्याभ्यां अर्थक्रियाविरहः तत्राह
अक्षणिको हि भावोऽर्थक्रियाजननस्वभावो वा भवेत् । अतत्स्वभावो वा नापरः प्रकारोऽस्ति । त
त्राद्यपक्षपरिग्रहे सर्वासामर्थक्रियाणामेकस्मिन्नेव क्षणे कृतत्वात् तस्य च पुनः करणानु
पपत्तेरनन्तरक्षणेऽर्थक्रियासामर्थ्यमन्यत्वात् असत्त्वक्षणापत्तेः क्षणिकत्वहानिः द्वितीयवि
कल्पावलम्बने तु कदाचिदपि ततो नार्थक्रियोदीयत इत्यसत्त्वसरणापत्तिरेव । स्यान्मतं अस्म
र्थोपि स्वभावतो भावः सहकारिसमवधानवशेन कदाचित्करोति तदभावाच्चान्यदा नेति । तदपि
विमर्दनं न क्षमते सहकारि किंचिदादधत्ते वा न वा आरभमाणोऽप्यर्थक्रियासाधनत्वाभिमतभावस्व
भावमतनमतत्स्वभावमतं वेति कल्पनीयं । अनारम्भेऽपेक्षार्थाभिधातव्यः न खल्वनुपकारकं प्रत्य रम०
पेक्षार्थवती । स्वभावमतारम्भे च भावस्याप्युत्पत्तिरापतति निष्कृत्यघमानोऽनुत्पद्यमानस्वभावो २५

25

भवति· विरुद्धधर्म्माध्यासस्यभेदापादकत्वात्· भावोदयांगीकरणे चाक्षणिकत्वपक्षपरिक्षयः। अत्र
तत्स्वभावस्यतादृग्भावस्यापगमेवभावस्यप्राग्वदसाधकत्वात्क्षणिकत्वात्क्रमेणार्थक्रियासिद्धिः।
अतएवाक्रमतोरर्थक्रियोदयः· तद्भावेभावात्तदभावेवाभावात्तनचतद्व्यतिरेकाव्यतिरेकाभ्यामन्यप्र
कारास्तिपरस्परविरुद्धयोरेकत्रसमवायप्रतीतिविरहात्। ननुक्षणिकोपिभावः किमर्थक्रियाज
ननस्वभावोतत्स्वभावोवेतिनमावीकल्पनामतिवर्त्तते। तत्रसमर्थस्वभावस्यसहकारिव्यपेक्षानस्या
त्· असमर्थात्तुनार्थक्रियोदीयते· अथतांपरमरहस्यंसौगतानां अत्यक्षणांप्राप्तेः समर्थएवभावः
कार्यमप्येकमेवारभते· किमितितर्हिसहकारिभिर्विनापिनकरोति। निरपेक्षस्यजनकत्वेसहका
रितावाकीदृशीतिवक्तव्यं· अत्रवदामः· यत्तावदिदमुच्यते· विनापिसहकारिभिः किमितिनकरो
तीतितत्तथागतमतकौशलविरहविजृंभितं क्षणिकोहिभावस्सहकारिभिर्विनानास्ति· कथम

तन्न करिष्यतियस्त्वत्तिनासौ स इति न किंचित्तत्सुस्थं। सहकारिभिर्विनापि किमिति भवत्स्येवेति पर्यनुयोगे हेतुस्वभावे स्तत्तरीमाव्यं ये यथा भवंति भावयंति च ते तथा भवंति भावयंति चेति स्व्यभ्युपगमः एककार्यकारिता च स्वगावर्त्तिनां सहकारिता नन्त्वतेप्यन्यनिरपेक्षा एव जनकाः किमिति नकार्यांतरमारभंते अत्रापि वयमनीशाः भावास्तु यदारभंते तदारभंता मित्यन्तु संमेव वयं प्रभवामः तेषामीजनका अपि संततस्तदेव जनयंतीति पर्यनुयुज्यताम स्माकं तावत्स्वेवाभ्युपगम ः। नन्वेकेन कृते परः किं करोतीति भवेदेतदेवं पर्यायेण क्रियायां सहक्रियायां तु कृत इत्येव नास्तिः नन्वेवमेकस्मादपि तत्तत्सिद्धिः किमपरे कुर्वंति नैतदेवं न हि ते प्रत्येकं सर्वकारिणः येनेदमालोचये युः अन्येन तु कर्तुमिदमस्माभिरपि विनासमर्थाः वयमिह न भवाम इति हेतुहेत्वधीन संनिधानात् भवितुं न समंत इति कात्रानुपपत्तिः। ननु कथमेकं कार्यमनेकस्मादुत्पद्यते कारणभेद एव हि

ः कार्यभेदस्यापि हेतुः अन्यथाकस्मिकतापत्तेः। उच्यते। न सहकारिकारणभेदाद्भेदः कार्यस्य किं तु
सामग्रीभेदादिति हेतुविंदौकृतपरिश्रमाणां अनायाससमधिगमनीयं। तस्मान्न क्षणिकपक्षेप्यक्ष-
णिकत्वपक्ष इव सहकारिपर्यनुयोगावकाशः बीजादीनां तु क्षणपरम्परापरिणामेनातादृशः क्षणः सं-
जायते यतोनपेक्षितदेशान्तरमवृत्तेरनन्तरमंकुरः प्रादुर्भवति। नन्वेवमपि परापरेषु बीजादिक्षण-
षु तदेवेदमिति प्रत्यभिज्ञा नोपपद्यते। अपि च प्रत्यभिज्ञप्रत्यक्षविरोधे कथमनुमानमात्मानं ल-
भत इत्यभिवाच्यं। लाभे वा वन्हावपि शैत्यानुमानप्रसंगः। समाधिरभिधीयते। ये ते क्षणास्तेषामास-
न्तिकं भेदं स्वसदृशान्तरापादृष्टमपि प्रत्याकलयितुमनीशस्य भेदाग्रहनिबंधनो भेदव्यवहारः प्रवर्तते
शुक्तिकायामिव रजतव्यवहारः। न चानुमानोदयविरोधः। अर्थक्रियाऽन्यथानुपपत्तेः। प्रत्यभिज्ञा-
नभेदाग्रहणेनाप्युपपद्यत इति निरवद्यं। अत एव वन्हावदंतिभवति वैमत्यस्मादनुमानं वलायद

शालि॰क्रा पूर्वके वेदमेव पश्यामः यदिति तदेवेदमिति विज्ञानद्वयमेतदिति · एकविज्ञानोदयकारणाभावात् · इ
२७ न्द्रियं हि संनिहिते व्याप्रियते · न तत्त्वां पूर्वकालसम्बन्धितारूपां परिस्पृशति · पूर्वानुभवभाविता च
भावनानेदन्तामपरकालयोगितात्मिकां मिनोति । तदिदं ज्वालाप्रत्यभिज्ञानेन व्याख्यातं · अपि च कृत
27 कानां भावानामवश्यंभावी विनाशः प्रतीयते : अतोऽपि शक्या क्षणभागितानुमा । । तथाहि य
द्येषां ध्रुवभावित्वं तेषां हेत्वंतरापेक्षा नास्ति : ध्रुवभावी च कृतकानां पदार्थानां विनाश इति विरु
ग द्धव्याप्तोपलब्धिः रूपानुपलब्धिलिंगकमनुमानं विनाशस्य हेत्वंतरापेक्षतां प्रतिक्षिपति । ध्रुवभाविता
हि निषिध्यमानहेत्वंतरापेक्षत्वविरुद्धत्वात् तदपेक्षत्वव्याप्तोपलब्धा विनाशस्य हेत्वंतरानपेक्षतामुप
स्थापयति सा च स्वविरुद्धहेत्वंतरानपेक्षत्वं निराकरोति · ये हि हेत्वंतरापेक्षास्ते ध्रुवभाविनो न भवंति एम॰
यथा वाससि रागादयः अतो हेत्वंतरापेक्षत्वविरुद्धतान्निरपेक्षत्वव्याप्तध्रुवभावित्वस्योपल २७

ब्धिः सैवाध्रुवः भावित्वस्यानुपलब्धिः अध्रुवभावित्वस्यानुपलब्धेः विनाशस्य हेत्वंतरापेक्षा ना
स्तिः। तथा यदि भावा अपि स्वभावहेतुभ्यो हेत्वंतरं विनाशं प्रत्यपेक्षेरन्· ततः तस्य हेत्वंतरस्य संनिधा
ननियमे प्रमाणाभावात्· कश्चिदर्थः कृतकोपि न नश्येतः। स्वहेतोस्तु विनश्वरस्योत्पन्नस्योदयानंत
रं एवापवर्ग इति क्षणभंगुरत्वसिद्धिः। अपि चेदमपि चिंतनीयं किं कृतका भावाः स्वहेतुभ्यः समुपजाय
माना अविनश्वरा एव जायंते· अविनश्वरा वा· विनश्वराणामुदयेनंतरमेव विलय इति क्षणभंगुरत्वसि
द्धिः॥ अविनश्वरास्तु न कदाचिदपि नश्येयुः। न च हेत्वंतरात्तेषां विनाशोदयः विकल्पासहत्वात्स हि जा
यमानो विनाशो भावाद्व्यतिरेकी अव्यतिरेकी वा· न तावद्व्यतिरेकी हेतुभेदाद्व्यतिरेकिणि तु जातेपि भाव
स्य प्राग्वदुपलब्धिप्रसंगः। तेन तिरोधीयत इति कल्पनायामपि तिरोधानं प्रत्येष विकल्पो वाच्यः इत्यलम
तिप्रसंगेन॥ अत्र केचिदेवं समादधति तदेवेदमिति· तत्तेदं ते परस्परसंवलिते समाकलय्यैकमिदं

शालिका प्रत्यभिज्ञासमाख्यां तं प्रत्यक्षज्ञाने स्मरणभेदरतानुमाने निरूपणाद्धि न वेदमिह समीचीनं हि एते ज्ञा
२८ नेग्रहणस्मरणरूपे यथायथं तत्तामात्र इदंतामात्रे च व्याप्रियमाणे नालमुभयानुभवसमयवर्त्ति
तामर्थस्याध्यवसातुमिति प्रतीतेर्विरोधात्· यथैव वस्तु भिन्नदेशकालं वस्त्वेकतया च कल्पितः तथा
28 चापि भिन्नदेशकालमप्येकतयैव परिस्फुरति· तथाविधसंवेदनोदयश्चानेकविज्ञानमंतरेणास्यैक
मेवेदं विज्ञानमंगीक्रियते· कार्यसद्भावोपपादनाय चाप्रतीतमपि कादारणं परिकल्पनीयं न पुनः कारण
मुखपरीक्षणेन स्पष्टदृष्टकार्यविपर्ययः पर्यालोचनीयः· तेन यद्यपि केवलादिंद्रियात् केवलाच्च प
र्वानुभवसमासादितजन्मनो भावनाभिधानात्संस्काराच्चैतदेवंविधं विज्ञानमुदेतुमर्हति· तथापि त
योरेवान्योन्यसमवधानसमासादितविशेषयोः कारिदं कार्यमित्याचार्यैः पर्यालोचनायां चक्रिरे राम०
न वेदमप्युचितं प्रत्यक्षमेवेदं न भवतीति· सत्यपि संस्कारोपयोगे इंद्रियव्यापाराधानजन्मतया २८

अस्यप्रथमसमागमसमयभाविनः सकलवादिनामपहस्तिततविवादानां प्रत्यक्षसम्मतादविशे
षात्· नचेदं प्रमाणाभासमिति किंच नप्रमाणमस्तिः बाधकप्रत्ययकारणदोषविषयसंवेदनां
तरविरहात्· नचेदमेवानुमानं बाधकमिति चित्तमनुरज्यतेः परस्पराश्रयदोषसमासत्तेः याव
त्खल्वेतद्धि ज्ञानमबाधितं तावदनुमानमेवनोदेतुं प्रभवति संजातवति चानुमाने बाधितमिदंभ
वतीति निश्चादतः इतरेतराश्रयः अबाधितविषयतापिवकारणमनुमनमानोदये अन्यथाकृतवह
पि किमिति शीततानुमीयते। नन्वेवं तर्हि कथं ज्वालादीनामेकत्वेनावधारितानामनुमानतो भेद
सिद्धिः अत्रसिद्धान्तसारमुदीरयन्तिः सामान्यविशेषात्मकानि सर्ववस्तूनि· तत्रज्वालगं हि प्रत्य
क्षं सामान्यविषयंः अनुमानंतु विशेषविषयमिति भिन्नगोचरत्वाद्विगणोः प्रत्यक्षानुमानयोर्विरोधा
भावान्नप्रत्यक्षेणानुमानोदयविरोधः कथंपुनरक्षणिकस्यार्थक्रियाकारिताक्रमेणेति· वदन्ति

शास्त्रिं० का सखलुसहकारिसमवधानेनोपहितविशेषो भावस्तानामर्थक्रियां क्रमेणैव सम्पादयति। ननु विक
२९ ल्पितसहकारादिभिः किं व्यतिरिक्तोऽव्यतिरिक्तो वा विशेष आधीयत इति· दूषणं चेह विकल्पद्वय
विकल्पिते एवमेवोदिते· अत्रापि त एवं प्रक्रियामनुक्रमयंति· नेदमस्मन्मतं· एकान्ततो भिन्नान्येव
सर्ववस्तून्यभिन्नानि वेति· किंतु सर्वभावेषु भेदाभेदौ संगिरामहे· तत्र भेदमात्रविकल्पालम्बन
29 संभवानि दूषणानि अभेदाश्रयेणानपरिहृतानि· अभेदमात्राश्रितानि च भेदावलम्बनेनेति
॥ नन्वेतौ भेदाभेदौ कथमेकत्र निविशेतां विरोधिनौ। अत्राप्याहुः। नेमौ विरोधिनौ सहदर्शना
त्सहानवस्थानलक्षणो हि विरोधः अनवस्थानं वा दर्शनवंधननिश्चयमिति नास्ति विरोधः। तदि
दमोवरितरमणीयमिति· प्रभाकरगुरूणानामन्यते· तौ हि भेदाभेदावेकत्र संभवतः· विरोधा एम०
त्· न च तयोः सहदर्शनमुपपद्यते· एकाकारप्रतीतिरेव खल्वभेददर्शनं तत्र यद्येक आका २९

रप्रतीतस्तद्दाविलक्षणाकारप्रतीतिर्नास्ति· विलक्षणाकारे च प्रतीयमानेनेकाकारप्रतीतिरुपा
स्ति· तेन भिन्नाभिन्नविशेषाश्रयणेनार्थक्रियासमर्थनमयुक्तमानं तत् न च प्रत्यभिज्ञानेनानु
मानविरोधः प्रत्यभिज्ञाया एव पदीक्षणायत्वात्· दृष्टा हि शुक्तिकायां तद्वेदं रजतमिति· मतिः सा
वस्यादृश्यवशेन भेदाग्रहणनिबंधनेति यत्काऽ ऋपिपदीक्षाः तत्र परीक्षमाणस्यार्थक्रियानु
पपत्त्या क्षणिकत्वेन निश्चिते सदृशपदापदोत्पत्तिविप्रलंभोयमिति निश्चीयते· भवति तु विमर्शतो
पि दिङ्मोहादिष्वनुमानवशेन जातायाअपि प्रतीतेर्विपर्ययः· द्रुतवहादि वोल्म्यादिप्रतीतिरूपजा
तापरीक्ष्यमाणापि नान्यथोपपद्यत इति न विपर्ययानुमानोदयः· तस्मादलमनेनेन नग्नादिकंदि
ग्नागपक्षपतितेन निर्बंधेनादर्शनेन गंभीरतद्गुरुदर्शनसागरपारदृश्वानस्तत्संप्रति समाधि
मभिदधाति· स्तंभादिषु प्रथममनुभूतेषु पनरंतरा तिरोधानादिवशेन विछिन्नोपलंभेषु पुन

30

रुभवतस्स एवायमिति मतिस्तावज्जायते· तत्र यद्यर्थक्रियास्थिरादपि कथंचिन्नोपपद्यते· त
तो भेदाग्रहणानिबंधनोयमभेदग्रह इति कथंचित्क्षणस्यैव उपपद्यते न तु स्थिरादपि सहकारिवशो
पजातागंतुकक्रियादीविशेषत्रयभाजः क्रमेणार्थक्रियास्थितिः सच विशेषो व्यतिरिक्त एव
भावादर्थक्रियाकारिणः नच स एवार्थक्रियाकारीः भावस्तदानइति चतुरस्त्रः तथाविधविशे
षयोगितैव हि तस्य साधनतायादनंतरमर्थक्रियोदयस्तत्र हि शेषयोगितयैव हि भावेषु साधनव्य
वहारो लौकिकानां कथं पुनरस्तो विशेषस्तस्येति व्यपदिश्यते· तदाश्रयतयैवानुमानंः स्वभाव
हेतुवशेनेति मत्वानिवर्त्ततां भवान् अलमस्माभिर्दूरमायातैः। अथ कस्मादिदस्यैव भेदोना
नुमीयते· प्रत्यभिज्ञानं न गुणयादिति वदामः· दृष्टानुसारि चानुमानमुचितं दृष्टोपपत्तिमुख ए॰
त्वात· यथा चार्थक्रिया दृश्यते· तथेदमपि दृश्यते स्थावरो भाव इति· तदनुगुणमनुमानमु ३०

च्चितं· तेन स्थावरेष्वप्यर्थक्रियाव्यापकक्रमयौगपद्यानिवृत्तेरसिद्धो व्यापकानुपलंभः तदसि
द्धौ च विपर्ययबाधकाभावादसिद्धं तन्मात्रानुबंधां क्षणिकतां न सत्तासाधयितुमलं· अनैकां
तिकत्वादिति· न चार्थक्रियाकारित्वं वस्तुत्वं न· किंतु प्रमाणसंबंधयोग्यता स्वरूपवत्ता च प्र
माणसंबंधयोग्यता अतोऽर्थक्रियामकुर्वन्नपि सन्निति न किंचिदवद्यं चेदमुदितमनपेक्ष
भावाद्विनाशं प्रतीति· तदपि विविच्यमानं जातुषमिवाभरणं विप्रतिपत्तिजनमनीषानलशिखा
वल्लमेकपदे विलीयते· किं खलु भवंतो विनाशमभिमन्यंते प्रध्वंसाभावो विनाश इति चेत्· किं पु
नः प्रध्वंसाभावः दध्नि क्षीरं नास्तीत्येवमारिकायविदुषामं विदितियघच्यतः· तदाम्नतकल्लाया
मुदितानीति रुद्राणीया· न हि नास्तीति बुद्धिरस्ति किंतु· दधिस्वरूपमात्रानुभव एव स्वयं प्रका
शेन शाद्वप्रयोगमात्रमेव से वहि पयसो नास्ति· तायादृश्यपितास्मिन्दधिस्वरूपमात्रोपल

ब्धिः नच तां प्रतिपद्यमान एव निरपेक्षस्य हेतुताः अनुपनिपतिते हेत्वंतरे पद्यमान एवोपलब्धेः नचे
दंपर्यंतरमुपलभ्यत इति शक्यं वक्तुं प्रत्यभिज्ञानस्याभेदसाधकत्वात्। ननु च हेत्वंतरापेक्षित्वे
31 ध्रुवभाविता नोपपद्यतेः ध्रुवभावितेव कुतोवगम्यतेः दर्शनादिति चेत् हेत्वंतराणाप्यवश्यं
भावेतव्यमिति दर्शनामेकवगम्यतमिति· नच वालावयवेयनैवं विधात्वादोद्दीपयामहेः य
त्पुनरिदमुक्तं· स्वहेतुभ्यो भावानामावेन स्वराणामुत्पत्तौ हेत्वंतरायत्ते विनाशे व्यतिरेकिता
ज्ञाते पि सर्वं वद्भावस्य उपलब्ध्यादिप्रसंग इतिः। अत्रोच्यते· उक्तमस्माभिर्यथा तन्मात्रोपल
ब्धिरेव विनाश इति· तेन तस्याहेतुसद्भावात्तथैव भवितव्यं· अनुपलब्धिरपि तस्यैवसे वेत्यनुप
लब्धिविनाश इति अनुपलब्धितस्य सैवेत्यनुपलब्धिरेव तस्य नोपलब्धितयां तद्विवेचन स्वाभा रत्न०
वव्यवहारोपि नभावव्यवहार इति सर्वमनाकुलं· स्वगताशीतिपविषमसत्ताभंगविषानला ३१

वलीलायः।मीमांसायाश्चिन्तातत्त्वमयी जीवरक्षेयं॥ ॥विश्लिताहितस्य विदुषां शालिकनाथेन
नाथमानेन।सरणभंगसंयद्दस्मामीमांसाजीवरक्षेयं॥ ॥इति श्रीप्रकरणपंजिकायां मीमांसाजी
वरक्षा॥ ॥आत्मतत्त्वे बहुविधा विवादाः संति वादिनां। वयं प्रमाभावेनात्र निर्णयाय यतामहे
॥केचिद्बुद्धिमेवात्मानमिच्छंति। अन्ये पुनरिंद्रियाण्येव देहमेवापरे तथैके बुद्धींद्रियशरीर
व्यतिरेकिणमनुमेयमाहुः। केचिन्मानसप्रत्यक्षगम्यं स्वयंप्रकाशं चके चितः सकलमतीति
स्त्विदमवेद्यत्वं त्वन्यामन्यते। क्षणिकं चके चिदाचक्षते नूः कूटस्थं नित्यमपरे। अणुपरिमाणः स
र्वगतइत्यादिवादिनो विवदंति सर्व सत्त्वेषु भिन्न इत्येके प्रतिक्षेत्रं नानाभूत इत्यपरे। तन्नि
र्णयार्थमिदमारभ्यते। बुद्धींद्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः। नानाभूतः प्रतिक्षेत्रमर्थ
वित्तिप्रभासतेः। न तद्बुद्धेर्वा बुद्ध्या भेदमुपलभामहे। कथयतो बुध्ये महं बुद्ध इति बुद्धेर्वा हारं

भिन्नमात्मानं प्रतिपद्यते॥ सत्यं हि बिंदूस्फानवत्॰ प्रतिविंबस्थानवद्वायं भ्रम इति प्रामाणिकाः। स
होपलंभनियमेन बुद्धेर्बोद्धस्याभेदो निराकृतः। भेदस्यानियमव्याप्तत्वात्तद्व्यापकविरुद्धोपलं
भनियमेन बाध्यमानत्वात्॰ तदाहुः अविभागोहि बुद्ध्यात्मा विपर्यासितदर्शनैः। ग्राह्यग्राहकसं
वित्तिभेदवानिव लक्ष्यते॥ तथायं बुद्धेरन्यं बोद्धारमिछंति तेपि मस्यामेव बुद्धौ तस्य विषये बोद्ध
तामाहुः। एवं च सैव वरं बोद्धी भवतु किमन्येन बोद्धा बोद्धा चात्मेति बुद्धिरेवात्मा सा च स्वयंप्रकाशा
कार्यकारणभावेनानादिसंततिवाहिनी स्वापमदमूर्छादिष्वपहुतयापुनरनुसंधानपदं नयांति
वहति त्वमेतास्वपि दशासु अन्यथा जागरादिप्रबुद्ध्यसंभवापत्तेः सचायमनादिर्बुद्धिसंता
नोऽनादिवासनानिबंधसंस्कारस्मपदर्शनाव्यवसितभेदः समुदयवशाद्वर्त्तते संसरति॰ मार्गसा एम॰
साक्षात्कारोन्मूलितनिखिलसत्वदृष्टिवासनानुबंधस्त्वछिन्नसमुदयः अमुच्यते॰ तदा वात्मना ३२

संतानोच्छेदः । तदाह ॥ प्रदीपस्येव निर्वाणं विमोक्षस्तस्य तायिन इति । तसंदंतः(?) प्रतीतिसिद्धस्य बहि
र्वोद्धुश्च भेदस्य निराकरणासंभवात् । सहोपलंभनियमश्च यथाभेदप्रपपद्यते(?) । तथात्रैव वक्ष्याम
निराकृतश्चायं वास्यार्थसिद्धावृजुविमलायां बुद्धिरेव परं वोद्धीति यदुक्तं । तदपि कालनिकेवोहरि
वक्तुं युक्तं । सासाम्प्रतीतिसिद्ध उत नावकाशोस्यास्तस्य लापस्यास्तापादिषु बुद्धिस्तत्र वर्तत इति यदु
क्तं । तदपि प्रमाणाभावादसारं । जागरादिषु बुद्धेश्चात्रैव कारणं वक्ष्यामः । एवं तर्हि भवन्त्विंद्रियाण्ये
व चेतनानीति एवं च बुद्धेर्बुद्धुश्च भेदाभासो व्यवहिष्यते । भवेदेतदेवं यदि दर्शनस्पर्शनाभ्यामेकार्थानु
संधानं न स्यात् । यमहमद्राक्षं तमहं स्पृशामीत्यत्रानुसंधाने कः प्रतीयते स्मरणं वेंद्रियाणां तत्तदि
याणां तत्तदिंद्रियापायेपि यदुपलभ्यते नेंद्रियचैतन्येनोपपद्यते । अस्तु तर्हि देह एवात्मा । न
च तत्रैमोदोषौ प्रसज्येते । मैवं ज्ञातात्यात्मानवस्य ज्ञातृता संभवति तथाहि देहो नाम पार्थिवोद

व्यविशेषः न च पार्थिवत्वेन तस्य भूतांतरगुणानुपलंभश्चापद्यते नेति भ्रमः भूतांतरासहितस्य भू
तांतरस्य कार्यारंभकत्वानेति भ्रमः न पुनर्भूतानि मिथोपि न संयुज्यंत इत्याचक्ष्महे अतः संयुक्त
भूतांतरगुणोपिलंभो नानुपपन्नः कथं पुनरारंभकत्वासंभवः । उच्यते न तावत्स्यं चाचां चतुर्णामा
रंभकत्वं संभयसंभवति चाक्षुषाचाक्षुषारब्धस्य समवायिनोऽचाक्षुषत्वापत्तेः यत्खलु चाक्षुषा
चाक्षुषद्व्यारब्धं तत्समवेतं न च चाक्षुषं वायुवनस्पतिसंयोगवत् चाक्षुषश्च देहः अतो न पंच
भिश्चतुर्भिर्वारब्धः आकाशानिलयोरचाक्षुषत्वात् कथं पुनरचाक्षुषं नभः अचाक्षुषस्य सत्तैव किं
प्रमाणिकेति चिंतनीयं । उच्यते न चाक्षुषं व्योमद्रव्यत्वे सति अरूपत्वात् कथं पुनरचाक्षुषं नभः अ
चाक्षुषस्य सत्तैव किं प्रमाणिकेति चिंतनीयं । उच्यते न चाक्षुषं व्योमद्रव्यत्वे सति अरूपत्वात् न राम॰
नु नास्त्रूपं गगने तद्धि धवलमुत्पलपलाशश्यामलं चोपलभ्यते उच्यते धवलिमा हि प्रायेणाते ३३

जस एव नीहारत्वोदकोपि: तदपगमे तदनुलंभात्· यत्तु नर्निशि नीलिमैवावलोक्यते· नासौ नभवतः
कस्य तर्हि न कस्यचित्· कथं पुनर्गुणो न कस्यचित्· सत्यं गुण एवायमसिद्धः· ननु प्रतीतिबलेन सिद्ध
एव: सत्यं सिद्ध तथ्यदि प्रतीतिरेव सिध्येत: सा तु कारणाभावेनासिद्धा· ननु चक्षुरेव कारणं· नह्यालो
कानपेक्षस्य चक्षुषः प्रकाशत्वात्· तेन प्रतीतावेव प्रतीतिभ्रमो मेदानां अत एव दिवा तदनुपलंभ:
अन्यथा सौरीभिर्भातिरनुगृहीतं चक्षुः स्फुटतरं व्योम्नो नीलिमानं प्रकाशयेत:। रूपं च स्पर्शसह
चरितमिति स्पर्शवत्त्वेन नभसः सर्वमूर्त्तद्रव्यप्रतीघातप्रसंगः। केचित्तमसो नीलिमा गगनस्या
लोक्यत इत्याहुः। तदसदित्येके: तमसो निष्पत्त्यनवक्लृप्तेः रूपवत्त्वेन तमो द्रव्यांतरं स्यात्:। तच्चा
नेकद्रव्यारब्धं स चाक्षुषं भवेत्· न तु तानि द्रव्याणि संति: संति च दिवाप्यारभेरन्· अतो धानाभि
वासौ नीलिमाभिमानो नभसः स्फटिकं यत्रैव प्रच्यते· छायेव तमः सा च चलत्वाचलत्वमहत्त्वाम

शास्त्रिका ह्रस्वदूरत्वासन्नत्वगुणयोगिनीव लक्ष्यतेति· तदप्यसारं निष्प्रत्यूहनवक्रमेरेव यच्चलत्वादिकमु
३४ पन्यस्तं तदपि स्थूलदर्शितयोः तथाहि· आलोकेऽपवारिते छायेष्यते अतोऽपवारितालोकभ
भागादिभावव्यतिरेकिणां न रूपांतरवती छाया दृश्यते· तेन मन्यामहे अपवारितालोकभूभा
34 गादिकमेव छायेति तेन महत्वामहत्वदूरत्वासन्नत्वादीनि समुन्मिषितानि· यच्च तेजसः प्रतिबो
चिद्व्यंतघ यथा यथा संसरति तथालोकः प्रतिमुच्यते प्रतिरुध्यते चेति चलंतीव छायावभा
ति· अन्यथा शरीरं पि चलति किमिति छाया चलेत् चलनहेतुभावात्· एतेनाचलति शरीरे चल
त्वं व्याख्यातं संख्यापरिमाणप्रचययोनिकं महत्वं तदभावे कथमिव छायायामस्त्यघतद्रूस्यत्व
मनया स्थूलदर्शिनः कथयानुवृद्धया। ननु भूभागादेरेव छायात्वे कथं द्रव्यांतरेणः व्यपदेशः अ एम०
स्येयं छायेत्युच्यते· अपवारितालोकभूभागादिरेव छायेत्युक्तं· तत्रयेनापवारणं तदपेक्षयास ३४

ज्यते व्यपदेशः एवं वस्त्वतिकारणमपि नाक्रमेतत्कामतश्चायामित्येवमादिव्यवहार उपपन्नः
योहिशास्त्रकाराणां व्यवहारः बत्रग्रहादीनां तु संख्यायाल्लक्षणं कार्यमिति सोप्यालोकाभिवा
रणाभिप्रायेणावसेनीयः ननु चालोकापवारणे मभागादेर दर्शनप्रसंगः। मैवं मवृरत्तयाश्रा
लोकावयवसंयोगस्तस्यवाप्यते: अल्पत्रास्कं तेजोवयवाः समंततः संसरंतः संयुज्यंत एवः
यत्रतु तेषामसंयोगः समहान्धकार इति निरवद्यं· यत्रविस्फारिताक्षः कूपादरादिसुषिरमध्य
समीक्षत इति तत्रापि तेजोवयवाः कूपनेमिलग्नावच्छेदात्तथा प्रतीयंत इत्युक्तं· नचैवं सत्या
काशस्यासिद्धिरेवशब्दलक्षणगुणानुमेयत्वात्· ननु गुणोनैव शब्दस्यासिद्धाद्रव्यभावेन वादिभिर
भ्युपेतत्वात्तत्वागिंद्रियवत्। तच्च न तावत्श्रोत्रं मुखदेशं गच्छति· मत्स्यसारिकस्तु शष्कुलीस्वदेश
स्यागस्थतेः।नापि मुखं श्रोत्रमुपगच्छतिः तस्यापि स्वदेश एवोपलंभात्· अतः श्रोत्रदेशागतए

शालि·का· वशाद्गोगस्यनेन्द्रियांतिरत्वेषामुरव शब्द इति· नच शब्दस्य संयोगलक्षणाप्राप्तिरूपघटन इति· समवाय
३५ लक्षणातस्यप्राप्तिः एवंच शब्दगुणकत्वात् श्रोत्रस्य शब्दगुणकद्रव्यमाकाशपदाभिधेयं· तदेव
श्रोत्रमितिसिद्धं· नतुपार्थिवं कर्णशष्कुलीं श्रोत्रमस्तु· संयुक्तसमवायेन वाकाशगतं शब्दमुप
35 लभतां नैहितदेवं· नहि सा साक्षात्प्राप्तिसंभवे प्रणाडीसमाश्रयणायुक्तं· नापि आत्मकं शरीरं गु
णांतरप्रादुर्भावाच्च· मजलतेजांसि यथाक्रममनुष्णाशीतशीतोष्णस्पर्शानि तैवारब्धं द्रव्यमे
तत् त्रयविलक्षणस्पर्शमापद्येत· चित्रपटवत्· यथाहि नीलादिरूपतंतुसमारब्धः पटस्तत्तु
विलक्षणरूपः तथा शरीरमप्यारंभकद्रव्यस्पर्शविलक्षणस्पर्शमभवेत· अनुष्णाशीतस्पर्शंवे
दमुपलभ्यते· एतेनत्र्यात्मकतापिनिषिद्धा·। किंचगंधस्यपार्थिवद्रव्यसमवेतस्यैकगाकिनोगंधा एम०
तरंभकत्वानुपपत्तेरगंधं शरीरं स्यात्· मतेजसोरपि जलसोश्चारंभकत्वे रसवत्त्वमेवं वेदितव्यं· ३५

अतो रूपरसगंधस्पर्शयोगि शरीरं पार्थिवमेवः ज्ञानं च विशेषगुणः कार्यद्रव्यविशेषगुणाः का
रणगुणपूर्वका रूपवत्स्पादिवत्· न तु कारणाभूतेषु पार्थिवपरमाणुषु ज्ञानमास्ते तदारब्धे द्रव्यां
तरे च तदादर्शनात्· स्यादेतन्मदशक्तिवच्चैतन्यमपीति· यथा मदशक्तिः पार्थिवघटकेष्व
प्यपि तदारब्धेस्वरारब्धे कार्यद्रव्ये निष्पद्यते· यथा चैतन्यमपि निष्पत्स्यत इतिः तत्र शक्तेर्विशेष
गुणत्वात्· शक्त्याख्यो हि गुणः सर्वद्रव्येषु तत्तत्कार्यविषयः कार्यतसमधिगम्योऽभ्युपेयते चैतन्यं
तु देहादन्यत्र गुण इति· विशेषगुणोऽसौः अपि च द्रव्यांतरसंयोगाद्कार्ये भूतेषु पार्थिवपरमाणु
षु कारणेष्वपि मदशक्त्याख्यो गुणो नानुपपन्नः· तदारब्धेस्वरारब्धे कार्यद्रव्ये कारणगुणपूर्वं
क एव चैतन्यं तु न मनस्संक्षेपरमाणुष्वभ्युपगम्यतेः तस्माच्छरीरादन्यस्य गुणो ज्ञानमिति देहव्य
तिरिक्त पुरुषानुमानं द्रष्टव्यं। स्यान्मतं· गुणत्वमेव ज्ञानस्यासिद्धमिति· तत्र द्रव्याश्रितत्वेन

शालि०का निर्गुणत्त्वात् यावत्संयोगविभागौ प्रति निरपेक्षकारणत्वाभावेन गुणत्वसिद्धेः। न चैवाचोद्द्रव्याश्रित
त्वमेवासिद्धमिति कार्यत्वात्· नहि कार्यं किंचिदद्रव्याश्रितमात्मानं लभते: एवं सुखादिभ्यो देहा
३६ तिरिक्तपुरुषानुमानं द्रष्टव्यं· नैतदेवं· यदहमहं जानामीति ज्ञातुरहंकारास्पदीभूतत्वादहं गच्छाम्य
36 हं स्थूल इत्यादावहंकारस्य शरीर एव प्रवृत्तेशविवादाच्छरीरमेव प्रत्यक्षज्ञातृ प्रतीयते· प्रतीय
ते· प्रत्यक्षविरोधे चानुमानमात्मानं न लभत इति वैशेषिकः। करणेनापि ज्ञानेन कारणगुणपूर्वकमि
ति पार्थिवेष्वविद्यमानमपि ज्ञानं शरीरे संभविष्यतीति न शरीरादन्यस्यानुमानं। न तु शरीरचै
तन्ये मृतशरीरेपि तत्स्यात्· नोतस्य विगुणत्वात्। मरणेन च च विगुणं शरीरमिति· अविवादं· न
तु ममेदं शरीरमिति देहातिरिक्तेऽहंकारोऽहंकारो निविशते· न च अभेदे भेदोपचारोयं· शिलापुत्र एम०
कस्य शरीरवत्· अन्यथा ममात्मेति व्यपदेशादात्मान्तरमप्याश्रीयेत:। येपि सुखादयस्तेपि वा ३६

चाहं सुखीत्यहंकारविषयो भूतसंबधितयावगम्यमानो शरीरसमवायिन एव : अतो न तत्र्व्यति
रेकिणमनुमापयितुमीशते : शरीरविकारहेतुत्वाच्च तेषां सुतरां शरीरगुणत्वं · न स्वतद्गुणत्वं कर्तुम
मुत्सहते : विक्रियते हि शरीरं नयनविकाशमुखप्रसादरोमहर्षादिभिः सुखादिषूत्पन्नेषु · तत्र शरी
रविकार्येविकारं प्रति समवायिकारणीभूते तत्प्रत्यासंने नैवासमवायेकारणेन भवितुं युक्तं । न च श
क्यतेवक्तुं सुखादि महात्मसंयोग एव शरीरसमवेतोऽसमवायिकारणमास्त्विति : प्रमाणाभावात् तत्सि
द्धेस्यात्मनित्यादेषां कल्पना · साध्ये तु व्यवहितानामेव कारणतोचितेति · न देहातिरिक्तानुमाने सु
खादीनां सामर्थ्यं · अत्रोच्यते : स्यादेतदेवं यदि देहातिरिक्तो नोपलभ्येत : ज्ञातावदेमहमुपलभ इति ब
टस्यानुभविता शरीरातिरिक्तः प्रतिभासते : शरीरं करचरणाद्यवयवयोगेन बटाद्यनुभवसमये न
स्यानुभवो अनुमी । अवश्यं च ज्ञानरवभासो मेयानुभवो चानुवर्त्तत इत्यास्थेयं : । अन्यथा स्वपरव्यव

शालिका योरनहि शायप्रसंगात्· अहं गछामीति प्रतिपत्तिसमयेपि प्रस्येता शरीरातिरिक्तः प्रतिपत्तृमात्र
३७ स्वभावो गंतारं देहं प्रतिपद्यमानः प्रतीयत एव· त्वासप्तिकाहंशद्वानुविद्धस्तु शरीरप्रत्ययः ममात्म
त्यपि त्वासप्तिकः· शरीर एव ममकार· यस्तु चेतनस्तत्रास्मच्छब्दो मुख्यः· न च शरीरं चेतनं वित्सम
वायाभावात्· शरीरव्यतिरिक्ते वस्त्वन्तरे समवायिनां हि चेतनाच कास्ति· नन्वात्मधर्मभूता चेत् चि
37 तिरनागतर्हि विषयासंस्पर्शिनां कथं प्रतिविषयं विभज्यते· उच्यते· प्रतिभाससिद्धा तावत्त्र चेतन
समवायिनी चिति अनागतातीतविषयसंवेदने च व्यक्तमेव विषयामाश्रितत्वं प्रतिकर्मविभाग
स्तु व्यवहारानुगुणत्वाच्चितेः। यद्व्यवहारानुगुणा हि या चितिस्तद्रूपा सा व्यपदिश्यत इति नाकिं
चिद्धीनं· नन्वेवं प्रथमदर्शनेपि देहव्यतिरेकिणा सिद्धे अपरोक्षहष्टे अन्येद्युरहमिदमदर्शमिति एम०
प्रत्यभिज्ञोपन्यासो निरर्थकः। उच्यते व्यतिरेकसिद्धावपि स्थिरतया क्रियावत्त्वसिद्धये प्रत्यभिज्ञो ३७

पन्यस्तात्र अस्थिरत्वे हि तत एव कादाचित्ककार्यसिद्धेर्न क्रियाणामानंत्यमते अक्रियस्य कर्त्तृत्वं भोक्तृ
त्वं कात्मनिकं स्यात्ः कर्त्ता भोक्ता च युज्ञायुधवा केन सिद्धः समर्थयितव्य इत्याशंक्य प्रत्यभिज्ञोप
न्यासः यद्वा चायमात्मा प्रत्यभिज्ञायते ततदा सो चिदाख्यो धर्मस्तस्य नाशो न तन्मात्रप्रभवः कदाचिद
दियात्. सदा संनिहितकारणे हि कार्ये न कादाचित्कं भवेत्ः कारणसंनिधाननिबंधनो हि कार्यव्या
क्षेपः तस्मादात्मा समवायिकारणभूतः किंचिदसमवायिकारणमपेक्षते: तत्र केचिज्ज्ञानलक्ष
णं व्यापारांतरं तत्समवेतमेवासमवायिकारणमाहुः। तत्त्वनुपपन्नमिति मन्यामहे। यतस्तस्या
पि किंचिदसमवायिकारणमाश्रयणीयंः। तद्वरं वित्तैरेवास्तुः तच्चात्ममनःसंनिकर्षाख्यंः तस्य
वासमवायिकारणं मनस एव पठिष्यंतः तस्याप्यात्ममनःसंनिकर्षांतरमात्ममनःसमवेतं प्रय
त्नादृष्टं वापेक्ष्यमाणमसमवायिकारणंः प्रयत्नादृष्टयोश्चात्ममनःसंनिकर्षांतरमेवेत्यनादिर

शालि॰का धाकार्यपरम्परावीजांकुरवदितिव्याख्येयाः मनसोप्यपगमेवमकल्पात्मगुणोदय एवप्रमाणांव
३८ द्धिसुखदुःखेछाद्वेषप्रयत्नादृष्टसंस्काराणामवानामपिवैशेषिकात्मगुणानामात्ममनःसंयो
गेनैवोत्पत्तिः तत्रबुद्धिः स्वसंवेदनसिद्धास्मापमितिस्मृतिरूपासुखदुःखेछाद्वेषप्रयत्नास्तुमा
नसप्रत्यक्षवेद्याः नचदुःखाभावमात्रंसुखंदुःखाभावस्यदुःखानलंभरूपत्वात् तद्धिसुखात्मो
38 पलब्धेरेवदुःखानुपलब्धिरूपत्वात् आत्मोपलंभातिरिक्तसुखोपलंभाच्च संस्कारस्यतुस्मृति
लक्षणमेवकार्यंगमकं अनुभूतएवस्मृतिर्भवतीत्यनुभवाधेयंकिंचिदात्मनोतिशयमुपक
ल्पयति अदृष्टंधर्माधर्मलक्षणमागमगम्यं नचकेवलात्ममनःसंनिकर्षादेवरूपाद्यवगमः।
अंधादीनामभावादितिचक्षुरादीनिवहिरिंद्रियाण्ययोगीक्रियंते पंचत्वंचरूपाद्युपलब्धिलक्षणका एम॰
र्यव्यवस्थानात्पंचचक्षुरादीनिकल्प्यंते एतंमनःप्रभृतीनिषडिंद्रियाणियास्मिन्नायतनेत ३८

दिंद्रियायतनं शरीरं॰ तत्र जरायुजांडजस्वेदजभेदभिन्नं त्रिविधं॰ उद्भिज्जं तु शरीरं न भवत्येव इंद्रि
यायतनत्वे प्रमाणाभावात्॰ यदपि श्मशाने जायते वृक्षः कंकगृध्रोपसेवित इति निषिद्धाचरणफल
त्वेन स्मरणादुद्भिज्जं शरीरमवभाति॰ तदनुपपन्नं अस्मिन्नंशे प्रमाणाभावात्स्मृतेर्निर्म्मूलतयास
त्वार्थानुपपत्तेः॰ न च वेद एवमत्वमवकल्पते॰ नञपि धेर्निषिध्यमानानुमाने प्रत्यवायहेत्वा
र्थे गमकत्वाभावात्॰ यद्यपि व्याधिकरणाद्वांतपर्य्यालोचनया निषिद्धासपकश्चित्प्रत्यवायो हय
तथापि वृक्षादिरूपशरीरफलवत्तावगन्तुं न शक्यते॰ फलतयान्वयायोग्यत्वात्॰ यस्यान्वयायो
ग्यत्वमवधृतं न तस्य वाक्यार्थानुप्रवेशित्वं वह्निना सिंचेदितिवत्॥ यत्तु वेदे तथाविधार्थप्रप्र
योगः स गौणो नार्थेन लाक्षणिको न वा वर्णनीय इति॰ अत्रापि गौण्या लाक्षणिक्या स्तावत्सेन मे
वत्रिविधमेव शरीरं॰ यत्तु नरपार्थिवं अयोनिजं धर्म्मशरीरं केवलधर्म्मनिबंधनं केश्चिदभ्युपग

शालि·का म्यते·तत्सर्वशरीराणांपार्थिवत्वाव्यभिचारात्तानुमातुंशक्यतेः सर्वशरीरेषुमनस्त्व विशिष्टमिं
३९ द्रियद्वयंमनश्चातः शरीरंपरमाणुपरिमाणंनतत्खलुद्रव्यमन्तःसंयोगगुणाभाषितयप्यतेः द्रव्यं
चद्विविधं अत्रमनेकद्रव्यंव·तत्रमनसोनेकद्रव्यत्वेकल्पनागौरवं· आरम्भारंभकद्रव्याभ्युपगम
39 प्रसक्तेः अनेकद्रव्यत्वेपिपरममहत्ताभ्युपगमे आत्मनासंयोगासंभवः नहिपरममहतोर्द्वय
वयोरपरिस्पंदयोश्चसंयोगोपपत्तिस्त्रिविधएवहिसंयोगः अन्यतरकर्मजउभयकर्मजस्सं
योगजश्चेति·तस्मात्परमाणुपरिमाणंमनः तस्यसहकारणत्वान्नित्यत्वं आशुतरसंचारित्वं
आशुतरेंद्रियाधिष्ठानदर्शनात्नहितदनाधिष्ठितमिंद्रियंस्वविषयमवभासयितुमलंः अन्यत्र
व्यासक्तचित्तस्याविषयांतराप्रतीतेः·तस्यचमनसोनादिधर्म्मापेक्षः सेत्रहेनसंयोगोदेहांतरसं राम०
योगश्च·तस्माददृष्टापेक्षादात्ममनःसंनिकर्षादुत्पत्रस्यकर्म्मणःप्रासादेनसोयमात्माभोक्ता ३९

भोगायतनं शरीरं भोगसाधनानिंद्रियाणि भोग्याः सुखादयश्चान्तराः वाह्याश्च पृथिव्यादयः भु
क्तिः स्वचितिरिति पंचसु विधासु एवं परिसमाप्यते केन पुनः प्रमाणेनास्यात्मनः प्रतिपत्तिः अ
प्रतीयमानत्वे वास्य सत्तापगमो निर्निबंधन एव । तत्र केचिदाहुः मानसं प्रत्यक्षं सुखादिष्विवात्मा
नि प्रमाणमिति । तदयुक्तमिति प्राभाकरप्रवराः नत्वेकस्य कर्म्मत्वं कर्तृत्वं च स्वापेक्षमुपपद्यते
स्वात्मनि क्रियावृत्तिविरोधात् । नवाहमितिवित्तिवशेनाविरोधः स्वयंप्रकाशत्वेन वा विषयप्रती
तिगोचरत्वेन वा तदुपपत्तेः विषयोमहोपलंभनियमश्चैवमुपपन्नः । अन्यत्तु मन्यंते । स्वप्रकाशा
य प्रमाणमप्रकाशस्वभावेषु विषयेषु पेक्ष्यते । प्रकाशस्वरसे त्वात्मनि प्रकाशमुवसंवित्तिवतः । प्र
माणफलभूता हि संवित्तिरवश्यं स्वयंप्रकाशाभ्युपगमनीयाः अन्यथापपत्त्यायामपि तस्याम
प्रकाशमानायां विषयानां विदितत्वावेदने विदितत्वव्यवहारो न स्यात् । नच व्यवहारयोग्यत्वेवप्र

40

रुषस्य वित्त्वाच व्यवहार उपपत्तेः फलेनानुमीयत इति। यतो व्यवहारप्रवृत्तेरपि परत्वाद्धि दितत्व
स्तां वित्तिरिति सर्वजनसम्मतमेतत्। नापि मानसप्रत्यक्षसमधिगमनीया संवित् स्वयंप्रकाशत्वे
नास्मदुपपत्तौ सत्यां तत्कल्पनायां प्रमाणाभावात् विषयेषु हि स्थायिषु स्वयंप्रकाशेष्वभ्युपगम्य
मानेषु स्वापादिदशाः पुरुषाणामनुपपन्नाः स्युः संवित्तु स्वयंप्रकाशमाना नैष दोषः स्वापादिषु तस्या
एवासत्त्वात्। विषयास्तु प्रत्यभिज्ञातत्वात् स्थेमानः पुरुषाणां स्वापादिदशास्वपि न सन्तीति न शक्य
ते ऽभिधातुं अतस्ते परायत्तप्रकाशाः संवित्तिस्तु स्वयंप्रकाशेति सिद्धो दृष्टान्तः। स्वप्रकाशस्य सं
शोपगमो न प्रमायत्तः एवं च तुरीयोऽपि प्रकाशो नो परमतेः अत एव मोक्षस्य पुरुषार्थता। अन्य
था विच्छिन्नसकलोपलम्भ उच्छेदाद् विशिष्टपुरुषैर्नार्थ्येत। तदपि प्रामाणिकाः न साधित्याहुः। स्वरस

प्रकाशत्वे पुरुषस्य जायन्त्वमन्तरा योऽपि च सुषुप्तोऽपि प्रकाशापत्तेः सुषुप्तस्तेभ्यो नभिधेतः नहि

स्वारसिकस्योच्छेद आवरणं वा संभवति॰ यच्चेदं केनचित्प्रलप्यते स्वारसिकमपि पार्थिवाना
मणूनां श्यामत्वं पाकप्रद्वेदनीयेनाग्निसंयोगेन निवर्त्तत इति॰ तदसत् यदकृतकं तत्सर्वमवि
नाशि गगनवत्॰ अकृतकश्च श्यामिमा पार्थिवानामणूनामिति॰ अनुमानप्रसक्तेनादरणीयं स्वारसि
कता च पार्थिवानामणूनां श्यामतायां न सिद्धा लोहितिम्न इव तस्यापि पाकजत्वेनाभ्युपगमा
त्॰ सहकारणत्वमेव नित्यत्वं न नित्यत्वलक्षणं किंचिदवतिष्ठते॰ तत्वविदस्त्वाचक्षते॰ न तावदा
त्मा विषयार्थिना चिभाति॰ विषयाश्च बोद्धर्यनवभासमानेनावभासन्त इति सिद्धं तत्र यदेतद्विष
येषु प्रमाणं तज्जनितेच्छया तं विल्लापुरुषं विषयांश्च विषयीकुर्वती समुदयते॰ तत्संवित्तिफ
लभागित्वेपि पुरुषस्य न कर्मता किंतु कर्तृतैव गंतृत्ववत्सत्यथा गमनफलसंयोगविभागभा
गिना गंतुर्न कर्म्मता किंतु कर्तृतैव तथा बोद्धुरपीति वेद्यं॰ परसमवायिक्रियाफलयोगिहि कर्मे

शालि॰का कर्मत्वात्ः अत एव च कर्मत्वकर्तृत्वेनात्मनः संभवतः अत एव च सहोपलंभानियमोपि विषय
४१ विषयिवित्तीनामुपपन्नः। एवं च विधयवित्तिगोचरत्वात्ः आत्मनोपि विषयवेदनोपायोपरमे
स्वपादिष्वप्रकाशायुक्त एव परीषस्य तुरीयेपि संस्तृतसकलत्वंभोपाय आत्मा सन्मात्रतयैवा
41 वतिष्ठते: न च मोक्षस्यापुरुषार्थता: सांसारिकविविधदुःखोपरमत्वान्मोक्षस्य: दुःखोपरमोपि
पुरुषैरर्थ्यते: न चेदं युक्तं यथा निखिलदुःखोपदमरूपत्वात्पुरुषार्थता तथा सकलसुखो
दहेतुत्वादपुरुषार्थतापीति: यतः सांसारिकं सुखं विवेकिनः साधनपारतंत्र्य लक्षणतयान्व
यितालक्षणतया च दुःखशबलितं दुःखमेव मन्यमानानात्यंतमाद्रियंते: विवेकिन एव मोक्षा
योत्तिष्ठंते· एवं च परमानंदाभ्युपगमोपि मंदफल एव: न तु प्रमाणमपि तत्रावकल्पते: श्रुती राम॰
नां सिद्धवस्तुबोधकत्वाभावात्: प्रत्यक्षविरोधश्च न हि संसारे तन्माथाविधानंदमनुभवंति ४१

नच गाभिभूततया नानुभवः स्वात्मिकस्य स्वयंप्रकाशस्यानंदस्याभिभवायोगात्: नच प्रेमास्य
दतयात्मन आनंदरूपतासिद्धिः आत्मनि प्रेमासंभवात्· शारीरोपघाते हि दुःखोदयादुपघात
परीहारं सर्वे प्रार्थयंत इति आत्मनि प्रेमानिमानः किंच संसारिणां स्वात्मिकः परमानंदो नानु
भूत एवेति कथं तन्निबंधन आत्मनि प्रेमा· अतो विषयविशेषसंभोग एवानंद इति सुहृदः मो
सक्तसांसारिक इत्वोपरमात्मस्वरूपार्थ इति पुष्कलं चः पुनरयं मोक्षः अविद्यास्तमय इति केचि
त्· एकमेवाद्वितीयमसंस्पृष्टलोकोपाधिपरिशुद्धिं ब्रह्म तत्त्वमनाद्यविद्यावशेन शरीरादिसद्वि
तीयमेवोपाधिकलुषितमिवावभासमानं लब्धजीवव्यपदेशं सद्दुःखमिव कल्पते· अतोऽना
द्यविद्येव संसारः निखिलविकल्पातीतपरिशुद्धविद्योदयामोहास्तमय एव मोक्षः तदिदं ब्रह्म
मात्रविजृंभितमिति प्रमाणपरतंत्राः न खल्वद्वैतं कस्य विषमाणस्य गोचरस्यात्मतं प्रत्यक्ष

शालिका मेवविधिमात्रोपक्षीणव्यापारमस्पृष्टान्योन्यभेदमद्वितीयमेव तत्वं सा साक्षात्करोतीति: तदसत: स
४२ त्यंविधाय कमेवमस्य सः तत्त्वविदधदपि रूपं रूपतयानसंतसत्तया विदधाति: न पुनः सर्वमेक
तया: यथा रूपेधारावाहिनी बहिरूपरूपा: तथा भूतैव यदि रसेपि स्यात तथा भूतैव यदि रसेपि
42 स्यात: तदाभवेदेवमस्य सैणसासाक्षात्कृतमद्वैतं: नचैतदेवमिति सर्वप्रतिपत्तिस्वसंविदितं: य
च्चप्रमेयविकल्पेन महासामान्यमेव वस्त्विति साधयता सत्तायामहासामान्यरूपत्वात्सत्वमेव
तत्वमिति साधितं तदपि गगनयासकल्पं: सत्यं नविशेषमात्रं वस्तु सत्यं च: सामान्यविशेषात्मक
मेकं वस्तु नास्तीति: किंतु सामान्यविशेषावन्योन्यसंबंधिनौ द्वे वस्तुनी: यथा च तथाभावेपीहप्र
त्ययोनान्वितया जातिनिर्णये निर्णीतं: अथागमादेवाद्वैतं सिध्यति: तत्र: आगमस्य को एम
यैकविषयतया सिद्धतत्वे प्रामाण्यानुपपत्तेः: अपि च वाक्यात्मागमः प्रमाणमिष्यते: त ४२

ह्यानेकपदात्मकः अनेकपदात्मकेवाक्यार्थेविधयमुपकल्पयनकथमद्वैतमेवभासयेतः अथेद
मुच्यते एवनेत्येषणंनेतीतिः सकलोपाधिनिषेधेननानाभूतवस्तुत्वंतरापाकरणाद्द्वैतभागमे
नसाध्यतइति तदप्यसारंः यः खल्वेवइतिसद्रूपतयाप्रस्तुतः पदार्थः सोऽसद्रूपापादके
ननञर्थेनसहसंबंधमयोग्यः अस्तिनास्तीतिवत् अन्वयायोग्ययोःपदार्थयोरन्वयासंभवा
न्नवाक्यार्थाभनेएवंतर्हिसर्वाण्येवनिषेधवाक्यानिनिराकृतानीतिनिः मर्हः मैवंपरिभवः नहिनिषे
धवाक्येषुकस्यचिदास्तीतिकोनिषेधः किंतुक्वचित्किंचित्निषिध्यते अद्वैताभिमानानुभवानास्त्यं
तिकमेवनिषेधमभिलषतिः सएवमात्मीयएववारोगोभवते रहरतिलब्धरूपेक्वचित्किंचित्ताद्दृ
गेवनिषिध्यते विधानमंतरेणात्वेननिषेधस्यसंभवइति प्रत्यक्षादिविरुद्धत्वादद्वैतावबोध
क अन्नायोनयथाश्रुतिवर्त्मयितंन्याय्यः यच्चेदंप्रपंचेनसाधितंमत्यक्षादिविरोधेप्याम्नायस्य

गालिका वल्लीयस्त्वतद्दर्शेनप्रत्यक्षादीनामिवभ्रांतताः कल्पनीयेति·तदपिमनोरथमात्रंप्रत्यक्षादिविरोधे
४३ पदार्थानामन्वययोग्यताविरहात्तद्विरोधेनाम्नायस्यैवानुदयः ततः प्रत्यक्षादिविरोधादाम्नाय
स्यगौणींलाक्षणिकींवावृत्तिंरास्थेया·तत्रानेकादिश्रुतयः स्वाभाविकद्वैः स्वाभावपरतयाव्याख्ये
43 याः·लौकिकानेकस्यकात्स्न्यायत्तयाद्वैः स्वानुपपत्ततयावर्णनीयाः। एकत्वश्रुतयश्चैकस्मिन्ना
यतनेएकस्यैवस्वामित्वमित्येवंपराः·इन्द्रोमायाभिःपुरुरूपईयतइति·देहाभिमानेनजन्मनि
जन्मनिभिन्नइवस्वभातीत्यर्थः·अनेकदेहपरिग्रहेप्येकएवात्मेतिननात्मनिषेधस्यार्थः·एष
नेत्येषनेतीतिशरीरादीनामात्मत्वनिषेधः·तद्व्यतिरिक्तात्मप्रतिपत्तिपरः·विज्ञानश्रुतयश्च
विज्ञप्तिक्रियायोगित्वात्व्योमादिभ्योविशेषाभिधानकलाः·सर्वात्मश्रुतयश्चसर्वस्यात्मार्थत्वात्ता रम०
दर्थ्यनिमित्तोपचाराः·आत्मनिविदितेसर्वमेवेदंविज्ञातंभवतीतियदुच्यते·तदात्मज्ञानस्य ४३

परमपुरुषार्थमोक्षफलतया तस्मिन्नज्ञाते सर्वमेव विज्ञानं निष्फलमिति दर्शयितुमित्येषादिक्
प्रदर्शिता ॥ अन्ये तु विन्नेर्भिन्नस्याप्रकाशात्मनः प्रकाश एवानुपपन्न इति · यद्यत्प्रकाशते तत्तत्प्र
काशादभिन्नं प्रकाशात्मकं च यथा स्वरूपं अतो प्रकाशात्मकं जगदिति सिद्धमद्वैतं · तदिदं स्वपक्षविरोधिक
थं यद्धि मतोभिदधति एवं हि नानाभूतानामाकाराणां प्रकाशादभेदः प्रकाशस्यापि नानात्वाप
त्तेरद्वैतहानिरतोपास्तं · अथोच्यते विविधोयमाकारप्रपंचो विद्यास्यात्मवशादाभासते इति · एतदपि
स्ववचनविरुद्धं स हात्माप्रकाशात्मनः सहासहात्मानस्तावदाकारा अभिन्ना इति न घटते · तथा स
त्यप्रकाशात्मानस्ते कथमिव प्रकाशेरन् · अपि चाप्रकाशात्मन एव प्रकाशः सम्बन्धीति वा स्वार्थ
सिद्धावुक्तं · तत एष माहायानिकपक्षप्रवेशो ब्रह्मवादिनां मोह एव · अपि चात्यन्तमसन्तं प्रपंचं क
थमिवाविद्या प्रकाशयितुमलं · भवत्वसत्ख्यातिरविद्या किं त्वग्रहणरूपैवइति नयवांथ्यांता

शालि॰का धितं॰ अतोनाविद्यात्ममयोमोक्षआत्यंतिकस्तुदेहेंद्रियसंबंधोच्छेदोनिःशेषधर्म्माधर्म्मपरिक्ष
४४ यनिमित्तोमोक्षइत्युक्तंधर्माधर्मवशीकृतोहिजीवस्तासुतासुयोनिषुसंसरतितयोरेकांतो
च्छेदात्व्यपगतदेहेंद्रियसम्बंधस्समुत्त्वात्निखिलसांसारिकदुःखानुभवोयुक्तइत्युच्यते॰
44 कथंपुनरशेषधर्म्माधर्म्मपरिक्षयः नतावदुपभोगेनः अनादिशरीरसंततिसंचितानांभोगस
मयेपिसंचीयमानानांकर्माशयानामनंतानामुच्छेत्तुमशक्यत्वे उच्यते। यःखलुसांसारिकेभ्योदुःखेभ्य
उद्विग्नस्तदनुषंगेभ्योपगतस्पृहोमोक्षायोत्तिष्ठतेसतावत्तद्धेतुभ्योनिषिद्धेभ्यःप्रत्यवायोत्सा
दकेभ्यःकाम्येभ्यश्चाभ्युदयसाधनेभ्योनिवर्त्तमानःसंचितएवौधर्म्माधर्म्मौभोगेनक्षपयन्तावदपिक्षप
यनशमदमब्रह्मचर्याद्यंगोपगृहीतेनात्मज्ञानेनसपुनरावर्त्तते॰ इत्यपुनरावर्त्तते॰ इत्यपुनरा एम॰
वृत्तयेचोदनेनविधिनानिःशेषंकर्माशयंनाशयन्मुच्यते॰ नचापुनरावृत्तेरर्थवादतयावस्मनं: ४४

आत्मज्ञानस्यापरार्थत्वात्परार्थे हि पर्णमयीन्यायेन फलश्रुतिरर्थवादतया वर्ण्यते अपरार्थे
तु स्वैवाधिविशेषणांशात्रिसत्रवतः नच कर्मविधेः शेषभूतमात्मज्ञानं उपकारलक्षणाशेषत्वनि
राकरणादित्यलमतिविस्तरेण। ननु युक्तस्यात्मनः सकलोपलंभातीतस्य सन्मात्रतया वास्थि
तौ किं प्रमाणं। उच्यते यदकरणं हि यत्तद्विनाशि गगनवत्सदकारणश्चात्मेत्यविनाशित्वात्
ध्रुवत्वसिद्धिः। परममहत्वं चात्मनः परिमाणं गगनवत्। यत्र यत्रात्मनो गुणा उपलभ्यन्ते तत्र त
त्रात्मा वर्त्तत इति प्रमाणसिद्धं। गुणिनमन्तरेण गुणस्यावृत्तेः तत्र त्वेष संशयः। किमयं गत्वागत्वा
संनिधीयते। उत गते निरपेक्षमेव तत्र गतिसव्यपेक्षाश्रयणं गतेरेव तावत्कल्पनं। तस्याश्चास
मवायिकारणकल्पनं। न च तत्र किंचित्प्रमाणमस्ति। अगच्छतोपि गगनवत्संनिधानोपपत्तेः।
अथोच्येत। यत्रापि देहो न वर्त्तते तत्रापि चेदात्मा संनिधीयते। ततः शरीरइव तत्रापि तद्गुणा नउ

शालि॰का पलब्धिः स्यादिति॰ तत्र॰ गुणानामात्ममनःसंनिकर्षोसमवायिकारणं स च संयोगो हि इष्टतया मनो विर
४५ हेन्यत्र न वर्त्तते मनश्च शरीरांतरेऽप्यस्ति इष्टतरस्फलं॰ यत्रैव चासमवायिकारणं तत्रैव कार्यमिति न बहि
र्देहमात्मनो गुणोपलंभः॰ नन्वेवं सति शरीरस्यापि गाने कल्पनयप्रमाणकमेव न तस्यैवैकत्वमतोन्य
45 त्रदर्शनप्रसंगात्॰ आत्मनो गुणो न स्तः सतोपि सफलकारणपर्याप्तीतस्य दर्शनप्रतीतिरापाद
यितुमशक्येत्यगत्या सर्वसंयोगिभिरात्मा संयुज्यते॰ तच्च परममहत्त्वमंतरेण संभवतीति नानुप
रिमाणः शरीरपरिमाणो वा शरीरपरिमाणत्वं च सावयवत्वं विनानुपपन्नं॰ तादृशं महत्त्वमवयव
वत्त्वमहत्त्वप्रचयविशेषाणामन्यतमास्मिन्नियतं न चावयवकल्पना प्रमाणवती॰ ननु सर्वगतत्वे
प्रत्येकस्य शरीरांतरेपि भोगप्रसंगः। मैवं॰ यस्य यच्छरीरं तस्य तद्भोगायतनं यगनियस्येन्द्रियाणि तत एम०
गनि तस्य भोगसाधनानीति नानंतरे भोगप्रसंगः॰ ननु शरीरेंद्रियव्यवस्थैव किंनिबंधनाः उ ४५

च्यतेः धर्माधर्मसमवायनिबंधनेति भवाननुबध्यतां यद्वीयाभ्यां धर्माधर्माभ्यां यानि शरीरेंद्रियाए
फपात्तानि तानि तस्यैव धर्माधर्मव्यवस्थैव निबंधनेति चेत् तदुपायभूतकर्मसंबंधायत्ताः क
र्मसंबंधव्यवस्था तु तत्समवायिकारणभूतशरीरेंद्रियनिबंधने त्यनादितया शरीरेंद्रियधर्माधर्म
संततेरस्त्वेवमुपपन्नेः आह विभुत्वे चात्मनस्तदा सर्वशरीरेष्वेक एवात्मास्तु गगनवत् यथाग
गनमेकमेवं तत्तदनेकघटमणिकादिसंबंधि तथात्मापि किं नाभ्युपेयते प्रत्यायतनं भेदाभ्यु
पगमेन: उच्यते यंस्तावत्प्रतिपत्ता परायतनेष्वगमेनं स्वप्रयत्नपूर्वकात्मीयशरीरसमवेतस
मानचेष्टादर्शनादनुमानतः परिच्छिनत्ति नासौ तं यावदेकैकात्मस्वात्मभूततया: किंतुयास्यको
निविष्टमस्वात्मभूतमेव तेन प्रतीतिसिद्धत्वात् भेदस्यात्मभेदाभ्युपगमे तिवचनमकिंचित्करं।
नहि परायतनस्त्वगमिन्येवमनुमानमुदेतुमलं यथा मम शरीरे मदीयप्रयत्नपूर्विका चेष्टा तथा

शान्ति·का परशरीरेपिमत्प्रयत्ननिबंधनेतिप्रत्यक्षविरोधात्ः प्रत्यक्षेणहिस्वात्मनिसमनंतप्रयत्नउपापद्य
४६ तेनपरशरीरचेष्टानुगुणप्रयत्नः स्वात्मनिपुरुषाणांप्रत्यक्षोभवतीतिपरएवपरशरीरेप्रतिप
त्त्यानुमीयते· नत्वेवमनुमानेनपरात्मप्रतीतौकथमिदमुच्यते· अयात्योदिनगरस्थतइतिपरेण
46 नगरस्थतइत्येतदभिप्रायमेतद्भवतीतिः उच्यतेः याहकैकारणतयोपरेणानेनस्थतइतितस्या
र्थः तस्मान्नाप्तिविरोधः किंचः नानाव्यवस्थातोनानाभूताः प्रतिक्षेत्रंपुरुषाधर्माधर्मसुखादि
व्यवस्थादर्शनात्ः अन्यथाह्येकस्यधर्माधर्मोदयः सर्वस्यभवेयुः। अथकश्चित्पंडितमन्यमा
नंप्राहकात्मनिकांसुखदुःखादिव्यवस्थाभविष्यतीतिः यथाएकस्मिन्नेवशरीरेपादादिवेदनानव्य
तिकीर्यतेतथाशरीरेष्वपिनव्यतिकारिष्यतइतिः याहिपादगतावेदनासानाशिरसिनचशिरोगता राम·
पादेनचवेदनापादादिष्वेवसमवैतितेषामसत्वात्ः ज्ञाताहिवेदनादिभिःसंबध्यतेःदुःखविशे ४६

षट्पत्तात्तात्तामिति· तदिदं बालजनविमोहनमिति वृद्धास्तथापि हि पादे मे वेदना शिरसि मे
वेदनेति सर्ववेदनात्वेकोऽहं सुखी मकाशात्तेपादादिषु संतापादिवमेव समवैति: तत्र संतापप्रत्ति
जन्मासह संयोगः मूलं तु वायुना सह इति: वातपित्तश्लेष्मणां क्षोभजेषु समस्तेष्वंगदेशेषु वेदितव्यं:
अचेतनानामपि पादादीनां पित्तादिसंयोगो न विरुध्यते नऽ सर्वेऽः स्वमात्मन्येव समवैति: अमा
च्यते· यथा प्रतिबिम्बभावे एकस्यैव बिम्बस्य मणिदर्पणादिरूपाणामुपाधिवशेन व्यवस्थितानि
श्यामत्वादीनि: तथैकस्याप्यात्मनोनेकशरीरोपाधिवशेनऽः सुखादयो व्यवतिष्ठंत इति: तदयुक्तं:
श्यामत्वादीनां औपाधिकानामुपाधिवशवर्त्तित्वात्· बिम्बसंबंधाभावात्· नैकधर्मधर्मिणां सता
व्यवस्था: सुखादयस्तु नोपाधिका:· किं त्वात्मसमवायिन एवेत्याकवर्त्तित्वात् व्यवस्थानुपपत्ति:
अपि च सिद्धे व्यक्तमेकत्वे स्यादेषा कस्य नानात्वे चात्मैकत्वे प्रमाणमस्ति: एकपुरुषश्रुतयश्च वर्त्ति

शा० का०
४८
47

तार्था इति ह्येत्र नानाभूताः प्रमां सइत्ति॥ नानाविवादसंदर्भतमः संघातभेदनः। एष शालिकना
थेनालालोकप्रकाशितः॥ ॥ इति प्रकरणेर्यरार्यजि कार्यातलालोकः॥ ॥ ॐ नमः शिवाय
॥ ॥ स्वरूपसंख्यार्थफलेषु वादिभिर्यतो विवादा बहुविधा वितेनिरे। अतो वयं तन्मतिबोधसिद्ध
ये प्रमाणपारायणमारभामहे॥ किं पुनरिदं प्रमाणं नाम। न तावदविसम्वादिज्ञानं प्रमाणं स्मृ
तेरपि तथाभावप्रसक्तेः। अथ स्मृतिर्विकल्परूपतया परमार्थतस्स्वलक्षणमगृह्णती संवृति सं
तमाकारमवस्तुभूतमुल्लिखन्ती हि चंद्रादिबोधवत्तनाविसंवादिबोधिनीति मतं। एवमपि नानुमा
ने प्रमाणं तस्यापि विकल्परूपत्वात्। अथाविकल्परूपमप्यनुमानमवस्तुविषयमपि वस्तुविष
यतयाध्यवसाय इत्यध्यवसीयमानवस्तुभूतस्वलक्षणाविसंवादितया तत्प्रमाणं। तर्हि स्मृतिर राम०
पि तथा स्यात्। सापि हि स्वलक्षणाध्यवसायिन्येव जायते। अपि चावस्तुभूतं स्वाविषयं वस्तुतया ४८

ध्यवसस्य शुक्तिकारजतबोधवत्कथमनुमानविसम्वादि: किंच यद्यनुमानं विकल्परूपतया स्वलक्षणं
न गृह्णाति· कथं तर्हि अध्यवस्यत्यपि: नहि ग्रहणादन्योऽध्यवसायो नाम: योऽस्याकारो न गृह्यते· क
थमसावध्यवसीयेतापि: प्रतीतिविरुद्धं वेदमुच्यते: स्मृतिश्चानुमानं च न वास्तवं वस्तुविषयां कुरुत इति·
विकल्पभूतयोरपि तयो: प्रत्यक्षप्रतीतिवत् स्पष्टयाहकत्वप्रतीते:। अथोच्यते न वयं यथावस्थितार्थग्रा
हकमविसंवादकमभिदध्महे: किंत्वर्थक्रियासमर्थवस्तुप्रदर्शकं प्रापकं· यदाभूतो हि वस्तुरूपेण प्रदर्शि
त· प्रवृत्तोपि यदि यथाभूतमेव प्रतिलभते तदा तदविसम्वादिज्ञानं प्रमाणमुच्यते:। तथा चोक्तं प्र
माणमविसंवादि ज्ञानमर्थक्रियास्थिति:। अविसंवादनं शाब्देप्यभिप्रायनिवेदनादिति वा पाठ:·प्रमा
णमविसम्वादिज्ञानं: अर्थक्रियास्थितिरविसम्वादनमिति। तथा नस्ताभ्यामर्थं परिच्छिद्य प्रवर्त्तमानो
ऽर्थक्रियायां विसम्वादित इति च। एवमपि स्मृते: प्रामाण्यात्· नहि तदुपदर्शितार्थस्य प्रतिलंभो

ग्रा·लि·का· ण्यापत्तिः। अथ मतं स्मृत्वार्थं प्रवर्त्तमानोऽपि नियमेनार्थं प्रतिलभत इतिः। एवमपि भूतार्थविषयमनुमा
४८ नं न प्रमाणं स्यात्· न हि तदुपदर्शितार्थस्य प्रतिलम्भोऽस्तीति। आह यद्यप्यनुमानप्रतीतस्य भूतस्य
वस्तुनः प्राप्तिर्नास्तिः तथापि तत्प्रतिबद्धालिङ्गज्ञानं तया तत्प्राप्तियोग्यतवदस्त्येव· तावता वतस्य
48 प्रामाण्यमितिः। एवमपि स्मृतिप्रमाणमापद्यतेः। स्मृतिरप्यनुमानवदर्थपारंपर्येण प्रतिबद्धै
व। यथा हि· वह्निस्वलक्षणाद्धूमस्वलक्षणं ततो धूमदर्शनं· ततो धूमविकल्पस्तस्माच्चानुमानमित्य
नुमानमर्थेन पारम्पर्येण प्रतिबद्धत्वादर्थप्रापणसमर्थं· तथा स्मृतिरपि अर्थादनुभवः। ततः
संस्कारः संस्काराच्च स्मृतिरित्यर्थप्रतिबद्धैवेतिः तत्प्राप्तियोग्यतया प्रमाणमापद्यते· यदिमन्वांतससा
मपि तत्प्राप्तियोग्यतया स्मृतेर्यत्तया प्रापयितव्यं स्वलक्षणं तदनुभवेनैव प्रापितमिति न प्रमा राम०
णं स्मृतिः। अनुमानं त्वप्राप्तस्वलक्षणप्रापकतया प्रमाणमितिः। एवमपि अर्थक्रियासमर्थैव ४८

स्तुपरिप्रापकतामात्रेन प्रमाणलक्षणं किंतु विशेषणमुपादेयं· अप्राप्तप्रापकमविसम्वादिज्ञानं
प्रमाणमिति:। अथोच्यते प्राप्तं प्रतिपादिकत्वमेवापरस्य नास्तीति: तदसत्· अर्थप्रतिबद्धता हि
प्रापकता: सा च ज्ञानांतरस्यापि नानुपपन्ना· यच्चोच्यते न प्रापकतामात्रेण प्रामाण्यमपि तु प्रवर्त्तक
तयापि· यत्प्रवर्त्तयति: प्रापयति च तत्प्रमाणमिति:। एतदपि नाकिंचित्· प्रवर्त्तकतापि ज्ञानांतर
स्यापि घटत एव। प्रवृत्तियोग्यार्थोपदर्शकत्वमेवाह प्रवर्त्तकत्वं तच्च भूतार्थविषयस्यानुमानस्येव
स्मरणस्याप्यस्ति। प्रवर्त्तकत्वं च प्रमाणलक्षणानुप्रवेशिनि निर्विकल्पज्ञानानामप्रमाणतास्यात्:
स्वयं व्यवहारप्रवर्त्तकत्वाभावात्· तदुत्थापितविकल्पा एव प्रवर्त्तकतया प्रापकतया च प्रमाणाप्रमाणा
भूता धारावाहिकज्ञानेषु च पूर्वप्रापितार्थविषयत्वादुत्तरेषां प्रामाण्यं न स्यात्। अथोच्यते
इष्यत एव तेषामप्रमाणतेति:। तदयुक्तं· लोके तेषां पूर्वस्मादविशिष्टत्वात् प्रमाणभावस्य। लौकिकं

शा०का० चप्रामाण्यंपरिस्फुटैरनुसरणीयं। अथभिन्नत्वादर्थस्मरणानांसर्वेषामवाप्राप्तप्रापकत्वमस्तीति। तस्य
४९ ता। स्मरणभेदस्यापभेदस्यापरामर्शात् तन्नदपेक्षात्प्रमाणतोचितेति: स्मरणाकृताचमीमांसाजीवरसायां
प्रतिक्षिप्तैवेतिकृतमतिविस्तरेण॥ नापिदृष्टमविसंवादघटस्यतार्थग्राहकंप्रमाणमिति। निप्रमाणल
क्षणमुपपद्यते: धारावाहिकज्ञानानामुत्तरेषांपूर्वस्मात्तनप्रतीतार्थाविषयतयाप्रामाण्यायाकर
49 णात:। नचकालभेदावसायितयाप्रामाण्योपपत्ते: सतोपिकालभेदस्यातिसौक्ष्म्यादनवग्रहा
त्। अपिचदृष्टमितिकिंनिवर्त्त्यं: संशयज्ञानमितिचेत्। क: पुनरेषसंशय: साधारणधर्ममात्रद
र्शनादेकशोविरुद्धधर्मास्यानेकस्यचधर्मस्यावगमात: वादिनाध्यवसायमानविशेषाणांविप्रति
पत्तेरिव अनध्यवसितविशेषवस्त्वन्यनियताविशेषविषयंज्ञानमितितार्किकाः। यथासंतमससति राम०
विशेषवस्तुनिदूरवर्त्तिन्यूर्ध्वतामात्रदर्शनेनकिमयंस्थाणुरुतपुरुषइति। तथाप्रत्यक्षोवायु ४९

स्पर्शवत्वात् पृथ्वीवत् अप्रत्यक्षो वायुः अरूपत्वात् गगनवत्· केचिन्नित्यशब्दमाहुः केचिदनित्यमिति वादि
नां विवादाज्जिज्ञासोत्तरः संशयः तद्यथा· यो हि तौ धर्मौ संदृश्येते तयोरेकमिदं· ज्ञानं नोदयते· किंत्व
एते विज्ञाने विशेषस्मरणात्तयोश्च विशेषयोरेकस्यापि तस्मिन्धर्म्मिणि निश्चयो नास्तीति एकं व्यवहारं
प्रतिपक्षाप्रवर्त्तयितुमशक्नुवन् संशेते इवेति संशयव्यवहारः ये च ते अरणोव तयोर्गृतयादकतये
वप्रामाण्यं निरस्तमिति कं हृदयग्रहणेन। अविसंवादिग्रहणमापेसर्वज्ञानानां यथार्थत्वादिविशेषकं
ननु च शुक्तिकायां रजतमिदमिति ज्ञानं प्रतिबिम्बादिज्ञानं च व्यभिचारि दृश्यते· नैतदेवं· यदि हि रज
तज्ञानं रजतविषयं न स्यात्· ततो व्यभिचरेदर्थे रजतविषयत्वे च को व्यभिचारः। ननु नेदं रजतविषय
ज्ञानं किंतु शुक्तिकाविषयमेव· उच्यते· शुक्तिकाविषयमिति कोर्थः किं यासौ शुक्तिकाव्यक्तिः तामेव
विषयीकरोति उत शुक्तिकात्वमेव। न तावत् व्यक्तिरनेन विषयीकर्तुं शक्या भिन्नत्वादाकारस्याकारि

णः। समीचीनरजतव्यक्तिरपि नरजतबुद्ध्यागोचरीभवति किंपुनः शुक्तिकाव्यक्तिः। शुक्तिकाद्यनवभास
50 मानमेव विषयमिति नोपपद्यते। अथोच्यते व्यवहारयोग्यतापत्तिर्विषयत्वमिति तथापि शुक्तिकात्व
मविषय एव। न हि सद्व्यवहारयोग्यतामापद्यते अवभासमानत्वमेव विषयत्वं तेन रजतत्वमेव विषयः
तच्च पुरोवर्त्तिन संभवतीति तद्विषयिणी स्मृतिरेवेयमिति कुतो व्यभिचारः। प्रतिबिम्बज्ञानं तु मुखाद्यव
भासं मुखादिविषयमेव स्वदेहाद्दर्पणादौ नयनरश्मिर्निपतितः प्रतिहतः परावृत्तो मुखादिना संयुक्त
स्तदेव मुखादि ग्राहयति। नन्वेवमपि सव्यदक्षिणविपर्यासो देशविशेषविपरिणामोऽल्पत्वमहत्त्वप्र
तिभासश्च किंनिबंधनः। अत्राभिधीयते मुखादेर्दर्शनं गृह्यते दर्पणादीनां तु ग्रहणमिति मुखादयस्त
द्देशा इवाभांति अभिमुखेन च मुखादिना नयनरश्मिः संयुक्त इति तथैव तदवगमात्सव्यदक्षिणवि एम०
पर्यासोऽपि युक्तः। अल्पत्वमहत्त्वे तु दर्पणाद्रश्मिप्रतिघातहेतोरल्पतया महत्तया वा दोषभूतया ५०

मुखादिपरिमाणाग्रहणाद्दर्प्पणादिपरिमाणाग्रहणाच्च मुखादिष्विव भासेते तेनात्रापि नास्ति व्यवहारः ए
वमादिवनयवोर्थ्यां निपुनतरमुपपादितमिति तयैव दिशी सर्वत्राव्यभिचारो वर्णनीय इति। नेदमपि
प्रमाणलक्षणं॥ अत्राह। प्रमाणमनुभूतिः। न स्मृतेः प्रामाण्यापत्तिरिति दर्शयति। सा स्मृतेरन्या
अथ का स्मृतिः स्मृतिं पुनः पूर्वविज्ञानजसंस्कारमात्रजं ज्ञानमुच्यते। न चैवं धारावाहिकज्ञानानां स्मृ
तित्वं इंद्रियार्थसंनिकर्षजत्वात् पूर्ववत्मात्रहणाच्च न प्रत्यभिज्ञाज्ञानस्य स्मृतित्वमिंद्रियार्थसंनि
कर्षस्तविव संस्कारजत्वात्। अथ कथं न स्मृतिः प्रमाणं स्मृतिः पूर्वप्रतिपत्तिव्यपेक्षणात् स्मृतिर्हि
तदित्फयजायमाना प्राचीप्रतीतिमनुरुध्यमाना न स्वातंत्र्येणार्थं परिछिनत्तीति न प्रमाणं। स्मृतिप्र
मोषस्तर्हि प्रमाणं न सोपि पूर्वप्रतिपत्तिसव्यपेक्ष एव तज्जन्यसंस्कारमात्राधीनजन्मत्वात् धा
रावाहिकत्वानेष तर्ह्युत्तरज्ञानानि स्मृतिप्रमोषादिविशिष्टानि कथं प्रमाणं तत्राह अन्योन्यनिरपेक्षास्तु धा

श्रा० रावाहिकबुद्धयः। व्याप्रियमाणे हि पूर्वविज्ञानकारणकलापे उत्तरेषामप्युत्पत्तिरिति। न प्रतीतितः उत्पत्ति

५१ त्तो वा धारावाहिकज्ञानानि परस्परमतिशेरत इति युक्ता सर्वेषामपि प्रमाणता॥ यद्यप्यनुभूतिमात्रं प्र

माणं ततो रजतमिदमिति यद्भ्रान्तिविज्ञानं तदपि प्रमाणं स्यात्। अतोच्यते। रजतमिदमिति नेदमेकं

5 ज्ञानं। किं तु द्वे एते ज्ञाने स्मरणानुभवरूपे। तत्र रजतमिति स्मरणं तस्यानुभूतित्वासंभवात्। न प्रामा

ण्यप्रसंगः। इदमिति च ज्ञानं अनुभवरूपं प्रमाणमेव। भ्रान्तिरूपता चात्र रजतज्ञानस्यैव स्मरणभूत

स्यग्रहणाव्यवहारप्रवर्त्तकतया व्यवहारे विसंवादकत्वात्। येऽपि च एकमिदं ज्ञानं मिथ्याभूतमास्थि

षत। तेऽपि बाधकप्रत्ययाधीनेथ्यात्वमभ्युपगच्छन्तो नेदमंशस्य मिथ्याभावं वदितुमीशते। तत्र बाधकाभा

वात्। बाधकप्रत्ययदशायामपि इदमंशस्यानुवृत्तेः। एकमपि च ज्ञानमर्थावच्छेदसमाश्रितभेदमप्रमा एम•

णं प्रमाणं च युक्तमेव। पीतशंखज्ञानं तर्हि प्रमाणं प्रमत्वं। तत्र हि पीतिमांशस्वरूपं च द्वयमप्यनुभ ५१

यत एव · नयनगतपित्ताद्रव्यवर्त्तिपीतिमाप्यनुभूयत एवेति · नयवीथ्यामुपपादितं शंखस्वरूपे चानुभूति

तिरविवादैव नायं दोषः को नाम पीतशंखज्ञानमप्रमाणमाह · प्रमाणमेवाहितत यथार्थविषयत्वात् · वि

ज्ञानद्वयं ह्येकज्ञानसाधारणरूपानमर्षात् · एकविज्ञानसदृशव्यवहारप्रवर्त्तकतया व्यवहारदशायां वि

सम्वादमावहात् · प्रमाणमपि सद्भ्रान्तमित्युच्यते ·। यत्र तु व्यवहारविसम्वादो नास्ति · तत्र भ्रान्तिरपि न व्य

पदिश्यते · यथोष्णजलज्ञाने · न तत्रापि जलगतमौष्ण्यमनुभूयते · किं तु व वयवगतमेव जलगतस्यौ

ष्ण्यस्य वह्निसंयोगेनोत्पादानानभ्युपगमात् · पाकजो हि गुणः पाकान्तरेणैव निवर्त्तते जलगतस्य चौष्ण्यस्या

नपेक्षितपाकान्तरस्यैवाग्निसंयोगविच्छेदेनैव निवृत्तेः गलनादि तत्र तेजःपरमाणवः संचारिताः तेष्वन्यत्र

गतेषु परतेजोऽवयवसंचरणविच्छेदे सत्येवापाकजत्वे पाकान्तराश्रौष्ण्यस्य निवृत्तिरिति पीतशंखादिज्ञा

न तुल्यतोष्णजलज्ञानस्य · तस्मात् पीतशंखादिज्ञानं प्रमाणमेव सद्भ्रान्तं चेत्यनवद्यं । यत्तु विपरीतख्या

शा० तिवादां उक्षजन्नज्ञानमप्रमाणंम्बांतंचाहतस्यसर्वलोकविरोधः॥ ॥कतिविधंपुनप्रमाणमित्यतआह
५२ तन्नुपंचविधंमानंअनेनैकादिसंख्याषडादिसंख्याचव्यवछिन्ना। काःपुनस्ताविधाइत्यतआहः। प्रत्यक्ष
मनुमानतथा। शास्त्रंतथायमानार्थापत्तीइतिगुरोर्म्मते· किंपुनःप्रत्यक्षस्यलक्षणं· तत्रकेचिदाहुःइंद्रिया
52 र्थसंनिकर्षोत्पन्नंज्ञानव्यपदेश्यमव्यभिचारिव्यवसायात्मकंप्रत्यक्षमिति·। इंद्रियस्यार्थेनसंनिकर्षाद्घटस्य
घटेज्ञानंतत्प्रत्यक्षमिति। तत्रसंनिकर्षःषोढाभिद्यते संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः
समवेतसमवायः संयुक्तविशेषणताचेतिः तत्रसंयोगात्। तत्रसंयोगात्पार्थिवाप्यतेजसानांद्रव्याणां
चक्षुःस्पर्शनाभ्यांग्रहणं। प्राप्यकारिचक्षुःवहिरिंद्रियत्वात्त्वगिवः। तैजसंहितत्त्वचक्षुःरूपप्रतीतिहेतु
त्वात्दीपवत्· तस्यरश्मयः प्रसर्वतोद्रव्येणसंयुज्यंततेचपृथ्व्याइति· पुनरन्यपिद्रव्याणिव्यञ्जवते। न राम०
न्वेवंसांतरग्रहणंनोपपद्यतेस्यातः प्राप्यकारित्वात्स्पर्शवतः। किंचसंयोगस्यगतिनिवंधनत्वात्·गति ५२

मतांवक्रमेणास्तन्नद्रागमनात्ःसमकालमासेदुषांद्वीयसांचार्थानांदर्शनंनोपपद्यतेः।उच्यतभोगा
यतननसव्यपेक्षतयासांतरग्रहणांतावदुपपन्नं।समसमयसन्केहनेतुकेचित्

५२

सात्त्विकमीमांसा

स्लोक ११२२

नं. ४२७३

प्रकार शा प त्रिका (३)



५२